M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No Ref. 15577

Ser. 1558

Title : Vidhan Parijat

Chap. III

1558

1557
1558

InComplete

C

| | | |
|---|---|---|
| Vidhan Parijat, Chapter III | | Title |
| Anant Bhatt | | Author |
| | | Editor |
| | | Year, Vols. |
| | | Publisher |
| 1558 | | Remarks |

।वि॰ या॰ श्रीगणेशाय नमः॥ वंदे श्रीमदनंतसंज्ञगिरिपं लक्ष्मीनिवासं हरिं विघ्नध्वांतदिवाक स्त॰
१ रं सुरगुरुं सर्वार्थसिद्धिप्रदं॥ ब्रह्माणं च वसुरेंद्रपूर्वकसुरा यस्य प्रसादात्सदा सर्वार ३
ंभसमाप्तिमीयुरनिशं मं हुंढादेवं परं॥१॥ नत्वा लक्ष्मीपतिं लक्ष्मं तथा ब्रह्मादिकान्सुरा
न्॥ गणेशं विघ्नहर्तारं वंदे हैमवतीसुतं॥२॥ चतुर्दशसु विद्यासु निष्णाताः शुद्धचक्षु
षः॥ अपरोक्षब्रह्मतत्त्वा जयंति गुरवो मम॥३॥ श्रुतिसकलरहस्यं बिंबितं यस्य चित्ते
मुकुर इव विशुद्धे दोषमालिन्यशून्ये॥ स्वपदविमलभक्त्या यस्य तुष्टो रमेशो जनक
जनकयज्ञं॥ भट्टमेनं ततोऽस्मि॥४॥ वंदे श्रीपितृचरणान्भट्टनागेशसंज्ञितान्॥ रामः
यत्प्रसादादहं प्राज्ञः संजातो जडधीरपि॥५॥ श्रीमदनंतभट्टोऽहं कारावशात्खीसंतोऽप्रियः १
कालस्य निर्णयं वक्ष्ये स्मृतिवाक्यानुसारतः॥६॥ कलाकाष्ठामुहूर्तादिकालेनाव
र्तयञ्जगत्॥ सर्वं नियमयत्येको हृदयेऽस्मात्स मे हरिः॥ उक्तानां कर्मणां कालः कर्त्त
त्वात्कालः प्रस्तूयते॥ स च षोढा॥ अब्दोऽयनमृतुर्मासः पक्षो दिवस इति॥ तत्रा

ब्दः भेदः॥ तदाह गर्गः॥ प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः॥ अंगिराः श्रीमुखो भावो
युवा धातेश्वरस्तथा॥ बहुधान्यः प्रमाथी च विक्रमोऽथ वृषस्तथा॥ चित्रभानुः स्वभानुश्च
तारणः पार्थिवो व्ययः॥ सर्वजित्सर्वधारी च विरोधी विकृतिः खरः॥ नंदनो विजय
श्चैव जयो मन्मथदुर्मुखौ॥ हेमलंबी विलंबी च विकारी शार्वरी प्लवः॥ शुभकृच्छोभकृ
त्क्रोधी विश्वावसुपराभवौ॥ प्लवंगः कीलकः सौम्यः साधारणो विरोधिकृत्॥ परिधा
वी प्रमाथी च आनंदो राक्षसो नलः॥ पिंगलः कालयुक्तश्च सिद्धार्थो रौद्र दुर्मती॥ दुंदुभी रु
धिरोद्गारी रक्ताक्षी क्रोधनः क्षय इति॥ अयनं द्वेधा॥ उत्तरं दक्षिणमिति॥ ऋतुः षोढा
मासद्वयात्मकः॥ वसंतग्रीष्मवर्षाशरद्धेमंतशिशिररूपः॥ मासाश्चैत्राद्याश्चतुर्धा
भिद्यंते॥ तदाह माधवाचार्यः॥ मासाः स्युः सावनाः सौरश्चांद्रो नाक्षत्र इत्यमी॥ दर्शांतिः
कौर्णिमांतो वा चांद्रो सौरो विप्रवैश्ययोः॥ सौरो राज्ञः सावनः स्यु यज्ञे ज्योतिषिके परः
॥१॥ इति॥ दर्शांतश्चांद्रो मासो विंध्यस्य दक्षिणे भागे॥ इतरस्तूत्तरे भागे व्यवह्रियते॥ सं

वि० पा० क्रांत्यादिसंक्रांत्यवधिः सौरो मासः॥ त्रिंशद्दिनः सावनः॥ नक्षत्रपरिवर्त्तेन नाक्षत्रः॥ एतेषां स्त०
२ व्यवस्थामाहगर्गः॥ सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः॥ आब्दिके पितृकार्ये च २
चांद्रो मासः प्रशस्यते॥ आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा॥ सावनेनैव कर्त्त-
व्या शत्रूणां चाप्युपासनं भवति चोत्तरे॥ अथ संक्रांतावेकवर्षे द्वौ चेत्संसर्प आ-
दिमः॥ क्षयमासो द्विसंक्रांतः स चांहस्पतिसंज्ञकः॥ त्रयस्त्याज्यास्त्रिवाहादौ संसर्पां-
हस्पती उभौ शुद्धौ॥ श्रौते तथा स्मार्त्ते मलमासो विविच्यते॥ काम्यारंभं तत्समाप्तिं
मलमासे विवर्जयेत्॥ आरब्धं मलमासात्प्राक् कृच्छ्रचांद्रादिकं तु यत्॥ तत्समाप्यं
सावनस्य मासस्यानतिलंघनात्॥ आरंभस्य समाप्तेश्च मध्ये स्याच्चेन्मलिम्लुचः रामः
प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेव तत्॥ कारीर्यादि तु यत्काम्यं तस्यारंभसमा २
पने॥ कार्यकालविलंबस्य प्रतीक्षाया असंभवात्॥ अनन्यगतिकं नित्यमग्नि-
होत्रादि कारयेत्॥ गत्यंतरयुतं नित्यं सोमयागादि वर्जयेत्॥ अगतिग्रहणस्नानंज्ञा

तेष्टिर्गतिसंयुता॥ द्वयं नैमित्तिकं तस्य अवस्था नित्यवन्मता॥ शुद्धमासमृतानां तु म-
लिने प्रथमाब्दिकं॥ मलमासमृतानां तु मलस्याद्वाब्दिकांतरमिति॥ जाबालोपि॥ द्वाद-
शाहसपिंडांतां कर्मग्रहणजन्मनोः॥ सीमंतपुंसवे श्राद्धं द्वावेतौ जातकर्म च॥ रोगेशां-
तिरलभ्ये च योगे श्राद्धं व्रतानि च॥ प्रायश्चित्तं निमित्तस्य वशात्पूर्वे परत्र च॥ अब्दोद-
कुंभमन्वादिमहालययुगादिषु॥ श्राद्धं दर्शेव्यहहरहः॥ श्राद्धं मृतादिमासिकं॥ मलि-
म्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकं॥ श्राद्धं तु दर्शदृष्टेषु तीर्थेष्वपि युगादिषु॥ म-
न्वादिषु च यद्दानं दानं देवे दिने च यत्॥ तिलगोभूहिरण्यानां संध्योपासनयोः क्रिया
॥ पर्वहोमश्च ग्रहणं साग्नेरिष्टिश्च पर्वणि॥ नित्याग्निहोत्रहोमश्च देवतातिथिपूजनं॥
स्नानं च स्नानविधिना व्यंभस्यापेयवर्जनं॥ तत्कर्त्तांचानिमित्तस्य नित्यत्वादुभयत्रचे-
ति मात्स्ये तु॥ अनिंदुरिंदुपूर्णा च हरिवारो बुधाष्टमी॥ नाधिमासे परित्याज्याः सीमं-
तान्नाज्ञानेशिन्नोरिति॥ अनिंदुरमावास्या॥ यद्यप्यत्र सर्वं वार्षिकश्राद्धं मलमासेषु

वि०पा० शुद्धमासे च कर्त्तव्यमित्युक्तं तथापि माधवहेमाद्र्यादिमतात्प्रथमाब्दिकं मलमासेऽपीति स्मृ०
३ याद्यं। आब्दिकं तु शुद्धमास एव कार्यं॥ असंक्रान्तेऽपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः। तथैव मा ३
सिकं श्राद्धं सपिंडीकरणं तथेति हारीतोक्तेः॥ वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि
। मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथेति सत्यव्रतीयं वचनं द्वितीयादिकं वार्षिका
विषयं। आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे॥ त्रयोदशे च संप्राप्ते न कुर्यात्पु
नराब्दिकमिति। यमस्मृतेः॥ निर्णयामृते तु श्राद्धदिनस्य वंध्यत्वनिरासार्थं पि चतुर्द
शेन ब्राह्मणभोजनं कृत्वा शुद्धमासे सपिंडीकं श्राद्धं कार्यं पिंडवर्ज्यमसंक्रान्तौ सं रामः
क्रान्ते पिंडसंयुतं॥ प्रतिसंवत्सरं श्राद्धमेवमासद्वयेऽपि चेति वृद्धपाराशरस्मृतेरि ३
त्युक्तं॥ अत्र देशाचारतो व्यवस्था ज्ञेया॥ क्षयमासे मृतस्य तु यस्यां तिथौ पूर्वा
र्द्धे मृतः सैव तिथिः क्षयमासात्पूर्वमासस्था ग्राह्या॥ उत्तरार्द्धे चेन्मृतस्तदोत्तरमा
सस्था तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयार्द्ध उत्तरः॥ मासाविति बुधैश्चिंत्यौ क्षयस्य

मासस्य मध्यगाविति हेमाद्रिः॥ मलमासे व्रतमुक्तं हेमाद्रौ पाद्मे॥ अधिमासे तु संप्रा
प्ते गुडखाद्ययुतानि च॥ त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने॥ एकस्मिन्वाहनि त
था नक्तेनाक्तेवापि यथाभावतः॥ त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे निधाय च॥ सघृतं
सहिरण्यं च ब्राह्मणाय निवेदयेत्॥ तत्र मंत्रः॥ विष्णुरूपी सहस्रांशुः सर्वपापप्र
णाशनः॥ अपूपान्नप्रदानेन मम पापं व्यपोहतु॥ नारायण जगद्बीज भास्कर प्र
तिरूपक॥ व्रतेनानेन पुत्रांश्च संपदं चाभिवर्द्धय॥ यस्य हस्ते गदा चक्रं गरुडो यस्य
वाहनं॥ शंखः करतले यस्य स मे विष्णुः प्रसीदतु॥ इति॥ अथ पक्षः॥ स च द्वेधा॥ शु
क्लः कृष्णश्चेति। देवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यत इति माधवाचार्यो
क्तेः॥ अथ तिथिः सा च द्वेधा। शुद्धा विद्धा चेति॥ तत्र माधवाचार्याः शुद्धा विद्धा त
था शुद्धाहीना तिथ्या अन्यया हानि॥ उदये पूर्वया तिथ्या विद्धा ते त्रिमुहूर्त्तकैः॥ स्या
यं तत्तरयातद्वन्मूलतया तु न विध्यते॥ वेधाऽपि त्रिमुहूर्त्तैव नन्यूना वेधमर्हति॥ शु

वि०पा० द्धायां नास्ति संदेहो दैवे पित्र्ये च कर्मणि ॥ उपवासश्चैकभक्तं नक्तं याचितं व्रतं ॥ दानं स्त०
४ च षड्विधं दैवं क्रमोदत्र विविच्यते ॥ एकोद्दिष्टं पार्वणं चापि त्र्यंद्धि विधमीर्यते ॥ अथ प्र ३
तिपन्निर्णीयते ॥ शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया ॥ उपोष्या प्रतिपच्छुक्ले मु
ख्या स्यादापराह्णिकी ॥ तदभावे तु सायाह्नव्यापिनी परिगृह्यतां ॥ प्रातः संगवमध्या
ह्नापराह्नाः सायमित्यसौ तत्राह्नः पंचधाभोगो मुख्यो द्वित्र्यादिभागतः ॥ अभावेपि प्र
तिपदः सैकल्प्यः प्रातरिष्यते ॥ तिथिस्त्रियामतो वर्ज्या तिथ्यंते पारणं भवेत् ॥ यामत्रयो
र्ध्वगामिन्यां प्रातरेव हि पारणं ॥ वस्तुसंभवं च पूर्वेद्युरुपवासवदाचरेत् ॥ मुख्यं तिथ्यंत रामः
राये तु तिथिशेषोपि गृह्यतां ॥ शुद्धाधिका तु कृष्णापि पूर्वा संपत्तिसंभवात् ॥ ग्रहीत ४
व्यासैकभक्ते मध्याह्नव्यापिनी तिथिः ॥ परेद्युरेव पूर्वेद्युरेव च व्याप्तिर्दिनद्वये ॥ नोभयत्रो
भयत्रांशे साम्यं वैषम्यमित्यमी ॥ षट् पक्षास्तेषु चैकैकव्याप्तौ सैवात्र गृह्यतां ॥ दि
नद्वयेपि तद्व्याप्तावव्याप्तौ चैकदेशतः ॥ उपवासप्रतिनिधेस्तिथिः स्यादुपवासवत् ॥ प्र

दोषव्यापिनी नक्ते तिथिर्व्याप्तौ दिनद्वये ॥ अव्याप्तिर्वाथवांशेन व्याप्तिः स्यात्सर्वथोत्तरा ॥
सौरनक्ते तु सायाह्नव्यापिनी न प्रदोषगा ॥ अयाचिते तु तिथयः स्वीकार्या उपवास
वत् ॥ सोदयत्रिमुहूर्ता यां कुर्याद्दानं व्रतानि च ॥ उभयत्र तथात्वे तु पूर्वेद्युस्तदनुस्थि
तिः ॥ परत्रैव तथात्वं चेत्पूर्वा ग्राह्या तिथिः क्षये ॥ तिथेः साम्ये च वृद्धौ च गृह्यतां तिथिरुत्त
रा ॥ अस्पृष्टे चैकदेशस्य व्याप्तौ पूर्वैव गृह्यतां ॥ एकोद्दिष्टे तु मध्याह्नयुक्ता स्यादेकभक्त
वत् ॥ एकदेशे समव्याप्तौ क्षये पूर्वाऽन्यथोत्तरा ॥ कुतपाद्यपराह्णान्तव्याप्तिरा
ब्दिके उत्तमा ॥ तदभावे ऽपराह्णस्य व्यापिका गृह्यतां तिथिः ॥ क्षये पूर्वोत्तरा वृद्धौ व्या
प्तिश्चेदपराह्णयोः ॥ न ग्राह्या तिथिगौ वृद्धिक्षयावह्नि तिथेस्तु तौ ॥ साम्ये तु द्वितिथेर्या
ह्यापरविद्धैव वृद्धिवत् ॥ नस्पृष्टेशस्य पराह्णो चेत्पूर्वा स्यात्कुतपोर्ध्वगा ॥ वैषम्येणैक
देशस्य व्याप्तौ ग्राह्या महत्त्वतः ॥ साम्येन चोक्षये पूर्वा परा स्याद्वृद्धिसाम्ययोः ॥ वृद्धि
साम्यक्षया ग्राह्या तिथिगा नो दिगाश्रया ॥ अथ द्वितीया ॥ पूर्वेद्युरसंनीप्रातःपरेद्युस्त्रि

वि०पा० मुहूर्त्तगा॥ साद्वितीया परोपोष्या पूर्वविद्धा ततोऽपरा॥ संचारणीयः सामान्यात्तिथि स्तं०
५ ष्वप्रतिपन्नयः॥ अथ तृतीया रंभा तृतीया पूर्वा स्यादुत्तरा स्याद्व्रतांतरे॥ परे ह्निनास्तिचे ३
त्पूर्वविद्धाप्यस्तु व्रतांतरे॥ मुहूर्त्तमात्रसंत्वेपि दिने गौरीव्रतं परे॥ शुद्धाधिकायामप्ये
वं गणयोगप्रशंसनात्॥ अथ चतुर्थी॥ चतुर्थी तु परोपोष्या गणनाथव्रतस्य
तु॥ मध्याह्नव्यापिनी चेत्स्यात्तदा नागचतुर्थ्यपि॥ परेद्युरेव मध्याह्नव्याप्तौ विद्धस्य
सोत्तरा॥ अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तितः॥ पूर्वेद्युरेव तद्व्याप्तौ पूर्वा सर्व
प्रिया तिथिः॥ नोचेत्स्यात्पंचम्या योगो ह्यंतद्विनिश्चयते॥ गौर्यां शुद्धजयाप्य रामः
स्तु नागविद्धा निषिध्यते॥ अथ पंचमी॥ सर्वत्र पंचमी पूर्वा ग्राह्या स्कंदव्रतेऽपरा॥ ५
अथ षष्ठी॥ नागविद्धा स्कंदषष्ठी सा निषिद्धा व्रतांतरे॥ उत्तरस्या अलाभे तु नागवि
द्धापि गृह्यते॥ अथ सप्तमी॥ सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि॥ अलाभे पू
र्वविद्धायाः परविद्धापि गृह्यतां॥ अथाष्टमी॥ व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी

परा॥ कृष्णाष्टमी च शुक्लापि पूर्वविद्धा विधीयते॥ पक्षद्वयेप्युत्तरयुक् शिवशक्तिमहोत्स
वे॥ ज्येष्ठायोगे तु पूर्वैव ग्राह्या ज्येष्ठाव्रते तिथिः॥ मध्याह्नादूर्ध्वमृक्षं चेत्परेः सा प्रशस्यते
त्वेष्टर्क्षभानुवाराभ्यां मुक्ताष्टम्यतिदुर्लभा॥ जयंत्याख्यव्रते तां भिन्नां लक्ष्मजन्माष्टमीव्र
तान्॥ शुद्धा च सप्तमीविद्धे त्येवं जन्माष्टमी द्विधा॥ सप्तमी चेन्निशीथात्प्राग्विद्धा शु
द्धाऽन्यथा मता॥ शुद्धायां नास्ति संदेहो विद्धा च त्रिविधेष्यते॥ शीघ्रयोगः पूर्वेद्यु
स्तरेद्युर्द्वयोरुत॥ पूर्वं वि प्रथमे पक्षे परे पोत्तरपक्षयोः॥ अष्टमी रोहिणीयुक्ता
जयंती सा चतुर्विधा॥ शुद्धा शुद्धाधिके च वं विद्धा विद्धाधिकेति च॥ शुद्धायामपि वि
द्धायां न संभाव्योत्तरा तिथिः॥ शुद्धाधिकायां योगः स्यादेकस्मिन्वा दिनद्वये॥ नैकयो
गोस्ति संदेहो द्वियोगे प्रथमं दिनं॥ सदा निशीथे पश्चाद्वा ह्युत्तमो मध्यमो मा योग
स्त्रिधापि पूर्वेद्युः संप्रत्याचादुपोषणं॥ विद्धाधिकायामप्येकदिनयोगसमुच्छ्रते॥
द्वयोर्योगस्त्रिधा भिन्नो निशीथे त्रिभेदतः॥ तद्वत्तिर्दिन एकस्मिन्नुभयोर्न्नभयोरिति॥

वि॰ पा॰ एकस्मिन्नेकलदिने स्यातां पक्षयोरुभयोः परा।। बुधे सोमे जयन्ती च द्वादशी सातिफलप्रदा।। ति रु॰
८ थिपक्षयोर्द्वयोरन्ते उत्तमं पारणं भवेत्।। एकस्यां तु मध्यमं स्याद् द्वयोरुत्तमं स्मृतम्।। या ३
स्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा।। अनन्तनर्मता जयन्त्याख्या दक्षयोग प्रशस्ति
तः।। नोपवासद्वयं कार्यमुभयोरुपरं दिनम्।। अथ नवमी।। नवमी पूर्वविद्धा च पक्षयो
रपि।। न कुर्यान्नवमीं चैव दशम्या तु कदाचन।। अथ दशमी।। ह स्मादपेत्ति रा शुक्ला
दशम्येवं व्यवस्थिता।। अथैकादशी।। सनत्कुमारसंहितायाम्।। एकादशी सदोपो
ष्या पक्षयोः शुक्लकृष्णयोः।। तस्यां तु भोजनं कुर्वन् रौरवे नरके व्रजेत्।। वरं स्वमातृ
गमनं वरं गोमांसभक्षणम्।। ब्रह्महत्या सुरापानं नान्नमेकादशीदिने।। सायमाद्यं रामः
तयोरह्नोः सायं प्रातश्च मध्यमे।। उपवासफलं प्रेप्सुर्जह्याद्भुक्तचतुष्टयम्।। अय ८
मुपवासो नित्यः काम्यश्च।। नित्यं सदा यावदायनं कदाचिद्दति।। क्रमेत्।। इत्युक्त्वा
तिक्रमे दोषश्रुतेरत्यागचोदनात्।। फलश्रुतेर्वीप्सया च बोधितं नित्यमुच्यते।।

द्वादशीन प्रमोक्तव्या यावदायुः सुवृत्तिभिः।। एकादश्यामुपवसेन्न कदाचिदतिक्र
मेत्।। परमापदमापन्नो हर्षे वा समुपस्थिते।। सूतके मृतके चैव न त्यजेद्द्वादशीव्रतं
।। पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणम्।। उपवासे त्वशक्तानामशीतेरूर्ध्वजीविनां
।। एकभक्तेन नक्तेन तथैवायाचितेन च।। उपवासेन दानेन न निर्द्वादशिको भवेत्।। प
योमूलं फलं वापि वृत्तिं कुर्वीत मानवः।। असामर्थ्ये शरीरस्य व्रते च समुपस्थिते।।
कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितम्।। भ्रातरं भगिनीं शिष्यं कारयेद्ब्राह्मणादि
कः।। एषामभावे त्वन्यं ब्राह्मणं विनियोजयेत्।। पितृमातृस्वसृभ्रातृगुर्वर्थे च
विशेषतः।। उपवासं प्रकुर्वीत पुण्यं शतगुणं लभेत्।। दक्षिणा नात्र दातव्या श्रवा
विहिता हि सा।। नारी च पतिमुद्दिश्य एकादश्यामुपोषिता।। यत्तज्जं फलमाप्नोति प्रा
ङ्गुरे चैव विपश्चितः।। उपवासफलं तस्याः पतिः प्राप्नोत्यसंशयम्।। राज्यस्य क्षत्रियस्या
र्थे एकादश्यमुपोषितः।। पुरोधाः क्षत्रियस्यार्द्धं फलमाप्नोति निश्चितम्।। पितामहा

वि० का० हीनं दिनद्वय एकादश्यामुपोषणे ॥ कृते तेतु फलं विप्राः समग्रं फलमाप्नुयुः ॥ ते पितामहाद स्तं०
८ यः ॥ कृत्वा दशगुणं पुण्यं प्राप्नोत्यत्र न संशयः ॥ एकादश्यां महोरात्रं भुक्त्वा चांद्रायणं २
चरेदित्यादि तिनियत्वावबोधकं ॥ एकादशीसमं किंचित्पापत्राणं न विद्यते ॥ स्व
र्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी ॥ सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी
अनया यास्यति नरो जैन्द्र प्राप्य ते वैष्णवं पदमित्यादि काम्यत्वाच बोधकं ॥ कश्यपैनैक
नक्तादिप्रतिनिधिः ॥ काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः ॥ काम्येष्युपक्रमा
दूर्ध्वं केचित्प्रतिनिधिं विदुः ॥ अथ एकादशीदिनत्रये तिकर्त्तव्यतालिख्यते ॥ ब्रह्मवैवर्त्ते ॥ रामः
प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि ॥ दशम्यामुपवासस्य प्रकुर्याद्दंत ८
धावनं ॥ अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः ॥ अवनीतल्पशयना प्रिया
संगविवर्जिताः ॥ इदमक्षारादिकमन्यस्याविहितप्रतिषिद्धस्याप्युपलक्षणं ॥ का
म्ये तदुपसंहारस्य वन्नूपकत्वात् ॥ उपवासफलं प्रेप्सुर्जह्यान्मुक्तं चतुष्टयमि

ति फलपदश्रवणेन काम्यविषयतास्पष्टीकरणाच्च ॥ व्रतारंभमंत्रो विष्णुधर्मोत्तरे ॥
शारीरमंत्रः ॥ करणोपघातं वाच मम विष्णुर्भगवान् शेषं ॥ शमं न यत्वस्तु मम हशर्म
पापादन्तो हृदि संनिविष्टः ॥ अंतः शुद्धिं बहिः शुद्धिं शुद्धो यमम योच्युतः ॥ स करोतु मे
ते सिंद्धरुचिरेवास्मिन्न संशयः ॥ बद्धोपवासोनन यो बाह्यं मम भगवान् जः ॥ शमं नय
त्येनं तामा विष्णुश्चेतसि संस्थितः इति ॥ एकादश्यां संकल्पमंत्रो वक्ष्यते ॥ उपवास
निर्वचनं विष्णुधर्मोत्तरे ॥ उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ॥ उपवासः
स विज्ञेयः सर्वभोगविवर्जितः ॥ इति ॥ पापेभ्यो व्रतांगनिषेधः रूपेभ्यः ॥ तानि च ॥
असत्यभाषणं द्यूतं दिवास्वप्नं च मैथुनं ॥ एकादश्यां न कुर्वीत उपवासपरो नर
इत्यादीनि ॥ गुणो व्रतांगत्वेन विहिते उपध्यानार्चनादिभिः ॥ ते च विष्णुधर्मोत्तरे ॥
तेजस्तपजपनध्यानं तत्कथाश्रवणादिकं ॥ तदर्चनं तस्यैव कीर्त्तनं स्मरणादिकं ॥
काद्श्यां विशेषेण कर्त्तव्यं भोजनद्वयं ॥ रात्रौ जागरणं चैव [illegible] वाच हरिकीर्त्तनं ॥
दि

वि० पा० उपवासः कृतामेते गुणाः प्रोक्ता मनीषिभिरिति॥ सर्वभोगाः भोजनतांबूलस्नानवनिता स्तृ०
८ संगादयस्तैर्वर्जितो वासोऽहोऽहोरात्रवस्थानमित्यर्थः॥ भोगास्तु विष्णुरहस्ये॥ ३
स्नानं ताम्बूलकं गंधादिस्वादनं परिकीर्त्तिनं॥ अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकां
क्षां॥ गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं॥ असकृज्जलपानं च दिवास्वापं च मै
थुनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यच्च निराकृतं॥ हारीतः॥ पतितपाषंडिनास्ति
कसंभाषणामनृताश्लीलादिकमुपवासादिषु वर्जयेदिति॥ वसिष्ठः॥ उपवासे
तथा श्राद्धे न खादेद्दंतधावनं॥ गायत्र्याः शतसंपूतमंबु प्राश्य विशुध्यति॥ केचि रामः
त्तु॥ तत्तापतोः सदा कुर्याद्दमामेकादशीं विना॥ तयोरपि हि कुर्वीत जंबूकुष्ठा ८
म्रपत्रैर्वेरियाहुः॥ स्त्रीणां संप्रेक्षणात्स्पर्शात्ताभिः संकथनादपि॥ भिद्यते ब्रह्मच
र्यं चिस्वदारेष्वपि संगमादिति॥ ब्राह्मे॥ एकादश्यां नरो मत्स्या निराहाराः स्वमा
हिताः॥ नानापुष्पैर्मुनिश्रेष्ठ विचित्रपुष्पमंडपं॥ हेमाचावरणं पश्चाज्जागरं का

रयेन्निर्निसं पूज्य विधिवद्विष्णुं श्रद्धयासुसमाहितः॥ प्रातः स्नात्वा हरिं पूज्य उपवासं स
मर्पयेत्॥ अज्ञानतिमिरांधस्येति मंत्रेण॥ द्वादश्यां पारणं कुर्याद्वर्जयित्वा चोपोदकामि
ति॥ माधवाचार्येपि॥ जयंती व्रतवन्नित्यं काम्यं चैकादशीव्रतं॥ अरुणोदयवेधस्त्व
वेधः सूर्योदये तथा॥ उक्तो द्विदशमीवेधो वैष्णवस्मार्त्तयोः क्रमात्॥ कलाकाष्ठा
दिवेधोपि ग्राह्यो त्रिमुहूर्त्तवत्॥ वैखानसाद्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः॥ विद्धा
त्याज्यो वैष्णवेन शुद्धा व्याधिकसंभवे॥ एकादशी द्वादशी वाऽधिका चेत्त्यज्यता
दिनां॥ पूर्वं ग्राह्यं तु तेनरस्यादिति वैष्णवनिर्णयः॥ तत्त्वादिस्तु॥ एकादशी यदा शु
द्धा द्वादश्यां वातिरिच्यते॥ उपवासद्वयं कृत्वा द्वादश्यामिव पारयेत्॥ कलावशादि
का वापि परे चेद्द्वादशी यदि॥ द्वादश्या द्वादशीं हंति चत्वेष्वपि पारणे कृते॥ इति पद्मपु
राणोक्तेरित्याहुः॥ उदयेन वमी किंचित्सकलो दशा यदि॥ तदापरं दिनं ग्राह्यमिति
वैष्णवसंमतिः॥ परमापदमापन्नो रु वे वा समुपस्थिते॥ नैकादशीं त्यजेद्यस्तु यस्य

 दीक्षास्ति वैष्णवी ॥ विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते ॥ यथाशक्त्या तथा लक्ष्मा 
 लुपोष्या वैष्णवैः सदा ॥ इति पद्मपुराणोक्तेः स्मार्त्तनिर्णय उच्यते ॥ एकादशी द्वादशी 
चैव मुनयं वर्द्धते सदा ॥ तदा पूर्वदिने ग्राह्यं स्मार्त्तैर्ग्राह्यं परं दिनं ॥ एकादशीमात्रवृद्धौ
गृहियत्योः सर्वेषां स्थितिः ॥ गृहस्थेन पूर्वा कार्या यतिनोत्तरा कार्येत्यर्थः ॥ द्वादशीमात्रवृ
द्धौ तु शुद्धा विद्धापि सर्वेषां स्थिते ॥ शुद्धा पूर्वैत्तरा विद्धा स्मार्त्तनिर्णयिरद्दशः ॥ द्वादशीमात्रवृद्धौ
स्मार्त्तैः पूर्वैव कार्येत्यर्थः ॥ यत्तु हेमाद्रौ ॥ बहुवाक्यविरोधेन संदेहो जायते यदा ॥ द्वा
दशी तु तदा ग्राह्या त्रयोदश्यां तु पारणं ॥ इति मार्कंडेय वचनं ॥ तथा संदिग्धेषु वाक्ये 
षु द्वादशीं समुपोषयेत् ॥ पारणं च त्रयोदश्यामाज्ञेयं मामकी मुने ॥ इति पाद्मवच 
नं च वैष्णवविषयमिति मंतव्यं ॥ विवादेषु च सर्वेषु द्वादश्यां समुपोषणं ॥ वैष्णव
स्तु तदा कुर्यात्त्रयोदश्यां तु पारयेदिति पुराणसमुच्चयोक्ते ॥ यत्तु ॥ एकादश्यां न भु
ञ्जीत पक्षयोरुभयोरपि ॥ वनस्थयतिधर्मोयं शुक्लामेव सदा गृहीति देवलवचनं ॥

शयनीबोधनीमध्ये या कृष्णैकादशी भवेत् ॥ सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाच
नेति पाद्मवचनं ॥ तथा च विष्णुवाक्यात् वनस्थस्य यतेश्चैकादशीद्वये ॥ उपवासो गृहस्थ ॥
स्य शुक्लायामेव पुत्रिणः इति सुमंतुवचनं पुत्रवद्गृहस्थस्य कृष्णैकादश्युपवासं निषेधयति
तत्तु वैष्णवविषयं ॥ पुत्रवांश्च गृहस्थश्च वैधव्ययुक्तस्तथैव च ॥ उभयोः पक्षयोश्चैव व्र
तं कुर्याच्च वैष्णव इति नारदोक्तेः ॥ उपवासनिषेधेपि भोजनं न कार्यं ॥ तदुक्तं वायवीय
संहितायां ॥ उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेत् ॥ न दुष्यत्युपवासेन उपवास
फलं लभेत् ॥ भक्ष्यमपि तत्रैवोक्तं ॥ नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथांबु
चाज्यं ॥ यत्पंचगव्यं यदि वापि वायुः ॥ प्रशस्तमत्रोत्तरमुत्तरं चेति ॥ अत्रैकादशीव्रते
प्रयुक्तं किंचिदुच्यते ॥ माधवीये ॥ कात्यायनः ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यून
वत्सरः ॥ एकादशीमुपवसेत्पक्षयोरुभयोरपि ॥ ब्राह्मणक्षत्रियो वैश्यः शूद्राश्चैव
तथा स्त्रिय इति ॥ यत्तु ॥ पत्यौ जीवति या नारी उपवासव्रतं चरेत् ॥ आयुष्यं हरते भर्तु

वि० पा० नरकं चैव गच्छतीति विष्णुवचनं॥ तत्तु भर्त्रननुज्ञाविषयं॥ भार्या पत्युर्मतेनैव व्रता- स्मृ०
१० दीनाचरेत्सदेति कात्यायनोक्तेः॥ एकादशीव्रताकरणे प्रायश्चित्तमाह कात्यायनः॥
अर्के पर्वद्वयरात्रौ च चतुर्दश्यष्टमी दिवा॥ एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत्॥
अथ दशम्यादिनियमाः॥ कूर्मपुराणे॥ कांस्यं मांसं मसूरांश्च चणकान्कोरदूषकान्॥
शाकं मधु परान्नं च त्यजेदुपवसन्स्त्रियं॥ तथा॥ शाकं माषं मसूरांश्च पुनर्भोजन
मैथुने॥ द्यूतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत्॥ हेमाद्रौ देवलः॥ असकृज्जलपा
नाच्चासकृत्ताम्बूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ अश- रामः
क्तौ चाम्बुपानेन नोपवासः प्रणश्यति। विष्णुरहस्येपि॥ गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बू- १०
लं चानुलेपनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यच्च विराकृतं॥ साधुसंज्ञा तेषु प्रायश्चि
त्तमुक्तं संग्रहे॥ स्तेनहिंसकयोः सख्यं कृत्वा सोन्यं च हिंसनं॥ प्रायश्चित्तं व्रती
कुर्याज्जपेन्नामशतत्रयं॥ मिथ्यावादे दिवास्वापे बहुशोम्बुनिषेवणे॥ अष्टाक्षरव्र

तीं जप्त्वा शतमष्टोत्तरं शुचिः॥ पैठीनसिरपि॥ ताम्बूलचर्वणे स्त्रीसंभोगे मांसनिषेवणे
॥ व्रतलोपो न चेत्कुर्यात्कृष्णनामजपं यदीति॥ वसिष्ठोपि॥ उपवासे तथा श्राद्धे न कुर्या
द्दन्तधावनं॥ दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलं॥ तल्लोपश्चेत्सदा कुर्यादमामेका
दशीं विनेति लत्तादेरपि निषेधः॥ प्रमादाद्दन्तकाष्ठभक्षणे प्रायश्चित्तं विष्णुरहस्ये॥
श्राद्धोपवासदिवसे खादित्वा दन्तधावनं॥ गायत्र्याः शतसंपूतमम्बु प्राश्य विशुध्यति॥ वर्ज
येत्पारणे मांसं व्रताहे च्यौषधं सदेति॥ एकादश्यां श्राद्धप्राप्तौ माधवीये कात्याय-
नः॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्॥ उपवासं तदा कुर्यादाघ्राय पितृसे
वितं॥ मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि॥ अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्
पितृसेवितमिति हेमाद्रिनिबन्धे च॥ अत्र वैष्णवानां विशेष उक्तः॥ नृसिंहपरिचा
र्यायां विष्णुभक्तिचन्द्रोदये च॥ पद्मपुराणे॥ एकादश्यां यदा राम श्राद्धं नैमित्तिकं
भवेत्॥ तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्॥ नचात्र काललोपः शङ्क्यः॥ तदा

वि॰पा॰ दिवानिसंबंधात्तदंतमपकर्षेस्यादिति तदंतापकर्षः। मांसान्यायसिद्धत्वादिति। स्मृति स्त॰
११ चंद्रिकायामपि॥ अन्नाश्रितानि पापानि तस्मेकुर्वतु रेवच॥ मत्तुंतिपितरस्तस्य नरके ३
शाश्वतीः॥ समाः। एकादश्यांतु तेनैव श्राद्धं कुर्वीत वैष्णवः इति। अथैकादश्यां व्रतसं
कल्पो माधवीये॥ गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्य
द्वा धीरो विचारयेत्॥ तत्र मंत्रः॥ एकादश्यां निराहारः स्थित्वाहमपरेहनि॥ भोक्ष्यामि पुंड
रीकाक्ष शरणं मे भवाच्युतेति। केचिद्रात्र्यां दंतधावनं कृत्वा देवाग्रेत्वमुं मंत्रं पठंति॥
तन्मंत्रस्तु॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसीद सुमुखो भूत्वा ज्ञानदृष्टि रामः
प्रदो भवेति॥ द्वादश्यां वर्ज्यान्याह बृहस्पतिः॥ दिवानिद्रां परान्नं च पुनर्भोजनमैथु ११
नं॥ क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्॥ ब्रह्मांडेपि॥ पुनर्भोजनमध्वायोभा
रायासमैथुने॥ उपवासफलं हन्युर्दिवानिद्रा च पंचमी॥ विष्णुधर्मे॥ असंभाष्या
न्हिसंभाष्य तुलस्यतसिकादलं॥ आमलक्याः फलं वापि पारणे प्राश्य शुध्यति॥ पार

णे पारणासमये॥ एकादशीव्रतं सूतकेप्यनुष्ठेयमित्याह विष्णुः॥ सूतके मृतके वापि
न त्याज्यं द्वादशीव्रतं॥ त्यजेच्चेन्नरकं याति यावदाभूतसंप्लवं। तत्र त्यक्ते दानादि सूत
कांते देयं॥ सूतके तु नरस्स्नात्वा पूजयित्वा जनार्दनं॥ दानं दत्वा विधानेन व्रतस्य फल
मश्नुते इति मात्स्योक्तेः॥ रजस्वलयापि कार्यं॥ एकादश्यां न भुंजीत नारी दृष्टे रजस्य
पीति पुलस्त्योक्तेः॥ एते नियमाः काम्यव्रते नियताः॥ नित्ये यथाशक्ति कार्याः॥ इति वि
ज्ञाय कुर्वीतावश्यमेकादशीव्रतं॥ विशेषनियमाशक्तौ अहोरात्रं भुक्तिवर्जित इति
ब्रह्मवैवर्तोक्तेः द्वादश्यां यदि श्रवणास्पृग्भवति तदा द्वादश्यामप्युपवासः कार्यः॥
शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता॥ तयोरप्युपवसेत्तत्र त्रयोदश्यां च
पारणमिति नारदीये॥ उपसद्याशक्तौ द्वादशीं समुपोषयेदिति च॥ अथाष्टौ म
हाद्वादश्यः। तत्र शुद्धाधिकैकादशीयुता द्वादशी उन्मीलिनी संज्ञा॥१ द्वादश्येव वृ
द्धाधिका वर्द्धमाना वंजुली॥२॥ वासरत्रयस्पर्शिनी त्रिस्पृशा॥३॥ अथाग्रे पवरागः सं

वि॰पा॰ कलाधिकत्वे पक्षवर्द्धिनी॥४॥ पुष्यर्क्षयुता जया ५॥ श्रवणनक्षत्रयुता विजया॥६॥ पुन स्त॰
१२ र्वसुयुता जयंती॥७॥ रोहिणीयुता पापनाशिनी॥८॥ अत्र मूलवचनानि कालनिर्णयदी ३
पिकाविवरणादौ ज्ञेयानि विष्णुप्रीतिकामेनैता अष्टौ महाद्वादशीरुपवसेत्॥ एकादशी
मुपोष्यैव द्वादशीं समुपोषयेदिति विष्णुरहस्योक्तेः॥ अशक्तो द्वादश्यामेव॥ एवमेका
दशीं त्यक्त्वा द्वादशीं समुपोषयेत्॥ पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति वि
ष्णुरहस्योक्तेरेव॥ अत्रान्येष्टमहाद्वादशीषु श्रवणद्वादश्युपवास एव कार्यः॥ सो
पि द्वादशीश्रवणयोर्मध्याह्नयोगे सत्येव॥ भुक्त्वा वा यदि लभ्या वा द्वादशी श्रवणा
न्विता॥ प्रातरारभ्य मध्याह्नव्यापित्वे समुपोषयेदिति विष्णुरहस्योक्तेरियमुक्ता॥ अत राम:
एव माधवाचार्यैरप्यन्यद्वादश्युपवासानुच्छेदः॥ श्रवणेन युता चेत्तस्या द्वादशी साहि १२
वैष्णवैः॥ स्मार्तैश्चोपोषणीया स्यादिति यदा द्वादश्यल्पा तदा विशेषो हेमाद्रौ मा
त्स्ये॥ यदा भवति स्वल्पापि द्वादशी पारणादिने॥ उषःकाले द्वयं कुर्यात्प्रातर्मध्याह्नि

कं तदा॥ नारदीयेपि॥ अल्पायामथ विप्रेन्द्र द्वादश्यामरुणोदये॥ स्नानार्चनक्रियाः का
र्या दानहोमादिसंयुताः॥ द्वादश्यातिक्रमे दोषमाह विष्णुधर्मोत्तरे॥ द्वादशी तु कला
मात्रा तस्यामेव तु पारयेत्॥ द्वादश द्वादशीर्हन्ति द्वादशी यदि लंघिता॥ अत्रैव सम्भवा
न्नां विशेषान्दृष्ट्वाह परिचर्यायां विष्णुभक्तिचन्द्रोदये च॥ द्वादशीश्राद्धं त्रयोदशीश्राद्ध
मपि कालमात्रद्वादश्यामेव कार्यं॥ तथा हि॥ एकादश्यां यदा रामेत्युपक्रम्योक्तं॥ द्वा
दशी चेत्कलामात्रा निशीथार्द्धमेव हि॥ अपराह्णक्रियाः सर्वाः कर्त्तव्याः शंभुशा
सनात्॥ इति॥ संकटे तु माधवीये देवलः॥ संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं॥
अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृत्॥ अशितानशिता यस्मादापो विद्वद्भिरी
डिता॥ अंभसा केवलेनैव कुर्याद्व्रतपारणमिति॥ अत्र विष्णुधर्मोत्तरे विशेष उ
क्तः॥ द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः॥ तमतिक्रम्य कुर्वीत पारणं विष्णु
तत्परः इति॥ मदनरत्ने॥ यदाल्पीयसी द्वादशी तदापि प्रातर्मुहूर्त्तत्रये पारणं कार्यं॥

वि॰पा॰ सर्वेषामुपवासानां प्रातरेव हि पारणं ॥ कुर्वीत मतिमान्नित्यं विना धारणपारणम् स्त॰
१३ मिति गर्गोक्तेः ॥ प्रमादादेकादश्युपवासातिक्रमे पराह्णे वा रोहे ॥ एकादशीविलु ३
ता॰ ताचेन्नु द्वादशी परत्र स्थिता ॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति ॥ एवमे
कादशीनिर्णयव्रतान्तरे तन्निर्णयमाह माधवाचार्यः ॥ उपवासव्रतादन्यव्रते
स्याद्विमुहूर्त्तकेः ॥ सप्तमी दशमी विद्धा मे तामेकादशीं यजेदिति ॥ द्वादशी पूर्व
विद्धैव निखिलेषु व्रतेष्वपि ॥ शुक्ला त्रयोदशी पूर्वापरा कृष्णत्रयोदशी ॥ अला
भे सापि पूर्वैव पारणं गत्रयोदशी ॥ यास्तु कृष्णा ग्रस्यते पूर्वा ग्रस्यता सा परा रामः
ह्निकी ॥ चतुर्दश्युत्तरा शुक्ला पूर्वा ह्लिद्दम चतुर्दशी ॥ उदये द्विमुहूर्त्तापि ग्राह्या १३
नन्तव्रतेतिथिः ॥ शुक्लापि रात्रियुक्ता स्यात् चेत्र श्रावणमासयोः ॥ शुक्लास्व
ल्पापि पूर्वैव यदि स्यादापराह्निकी ॥ प्रदोषव्यापिनी शैवा द्वयोर्वायाउत्ति
स्ता भवेत् ॥ शिवरात्रिव्रते तत्र द्वयोः सत्वात्प्रशस्यते ॥ तदभावे निशीथैकव्या

पिनी परिगृह्यतां ॥ तस्याश्चासंभवे ग्राह्या प्रदोषव्यापिनी तिथिः ॥ पूर्वविद्धैव सावित्री
व्रते पंचदशी तिथिः ॥ नाज्योष्टादन्यास्तस्य स्पृष्टे तत्र परेहनि ॥ व्रतांतरात्तिस
वलि परेहन्येव सर्वदेति द्वादश्यादिनिर्णयः ॥ अथामावास्यानिर्णयः ॥ साच व्र
तादौ परविद्धा ग्राह्या ॥ भूतविद्धा न कर्त्तव्या अमावास्या च दूर्शिमि ॥ वर्जयित्वा
मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्त्तवचनात् ॥ अत्र योगविशेषफल
विशेषमाह शातातपः ॥ अमावास्या भवेद्वारे यदा भूमिसुतस्य वै ॥ जाह्नवी
स्नानमात्रेण गोसहस्रफलं लभेत् ॥ अमावास्या सोमवारे [illegible]ार रविवारे तासप्त
मी ॥ चतुर्थी भौमवारेणाचिषुवस्सदृशं फलं ॥ व्यासोपि ॥ सिनीवाली कुहू वापि
यदि सोमदिने भवेत् ॥ गोसहस्रफलं दद्यात्स्नानं वै मौनिना कृतमिति ॥ श्रा
द्धे त्वमावास्या त्रेधा विभक्तदिने स्यात्तृतीयांशव्यापिनी ग्राह्या ॥ पिंडान्वाहा
र्यकं श्राद्धं क्षीणे राजनि शस्यते ॥ वासरस्य तृतीयेंशे नातिसंध्यासमीपतर

वि॰पा॰ त्तिकात्यायनोक्तेः॥ दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनं॥ पूर्वविद्धमकुर्वाणो नर स्त॰
१४ कं प्रतिनारदीये निंदनाच्च॥ दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं॥ अपराह्णे पितॄ ३
णां च तत्र दानं प्रशस्यत इति शातातपोक्तेश्च॥ दिनद्वये तत्र सत्त्वे यास्त्वपराह्ण
व्यापिनी साग्राह्या॥ अपराह्णव्यापिन्यमावास्या यदा न वेत्॥ तत्राल्पत्वमे
हत्त्वाभ्यां निर्णयः पितृकर्मणि॥ अल्पापराह्णे यात्वाऽमाग्राह्यास्यात्साऽऽधि
को भवेदिति माधवीये स्मृतेः॥ दिनद्वये पराह्णेंऽशतः समत्वे सौ तु॥ अमा
वास्या तु या हि स्यात्पराह्णद्वये समा॥ क्षये पूर्वा परा वृद्धौ साम्ये पि च तिथिस्मृ रामः
तेति निर्णीतत्वात्॥ दिनद्वये पराह्णव्याप्त्यभावेऽशतो व्याप्तौ च तिथिक्षये पूर्वा १४
ग्राह्येति हि माधवः॥ यदा चतुर्दशीयामं तुरीयमनुपूरयेत्॥ अमावास्या क्षीय
माणा तदैव श्राद्धमिष्यत इति कात्यायनोक्तेः॥ क्षीयमाणा परदिनेऽपराह्ण
व्यापिनी न चेदित्यर्थः॥ तथा च बोधायनः॥ चतुर्दश्यां च तु यामे प्यमावास्यो

न दृश्यते॥ श्वोभूते प्रतिपत्स्या भूते कव्यादिक क्रियेति वर्धमानत्वे तु परास्याच्च॥
परेऽह्नि तृतीयेंऽशे चेद्घटिकार्धेप्यमा यदि॥ तत्रैव पितृयज्ञः स्यादन्यथाऽप्रथमेऽ
हनीति स्मृतेः॥ पिंडपितृयज्ञस्तु कात्यायनैर्योगादिनात्पूर्वेद्युः कार्यः॥ पूर्वो वांग
त्वात्पिंडपितृयज्ञ इति॥ तत्सूत्रात्॥ व्याख्यातं चैतत्कर्काचार्यैः॥ पूर्व एव दर्शा
त्पिंडपितृयज्ञेन प्रसृष्टात्॥ पूर्वेद्युः पितृभ्यो यज्ञं निर्वपणीय प्रातर्देवेभ्यः प्रतनु
त इति च॥ तेन तत्त्वांगमेव पिंडपितृयज्ञः॥ तदुक्तं॥ अंगं वा समभिव्याहारादि
ति॥ तेन कर्काचार्यमते चतुर्दशीयुक्ते दर्शे पिंडपितृयज्ञः कार्य इति॥ श्रीम
दनंतभाष्ये तु पूर्वेद्युरित्युक्तं॥ अत्र द्वैधाप्याचारो दृश्यते॥ आपस्तंबानां परदि
ने त्रिमुहूर्तमपि दर्शसत्त्वे तत्रैव पिंडपितृयज्ञो भवति॥ अमावास्यायां यदह
श्चंद्रमसं न पश्यंति तदहः पिंडपितृयज्ञं कुरुत इत्यापस्तंबसूत्रात्॥ रुद्रदत्ता
दिभिस्तथा तद्व्याख्यानाच्च॥ यदेवैषां पुरस्तात्पश्राद्दर्शोऽथ पितृभ्यो ददाती

वि०पा० तिशातपथश्रुतेश्च ॥ आश्वलायनानामपि दर्शपर्वणि पिंडपितृयज्ञः स्यात् ॥ अमावा स्व०
१५ स्यायामपराह्णे पिंडपितृयज्ञः स्यादाश्वलायनसूत्रात् ॥ नारायणवृत्तिकृन्मिश्र ३
व्याख्यातत्वाच्च ॥ यत्तु ॥ पक्षांते कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ॥ पिंडयज्ञं त
तः कुर्यात्ततोन्वाहार्यकं बुध इति क्रमविधायकं लौगाक्षिवचनं विरुद्धमिव दृश्यते
तन्नु संपूर्णदर्शविषयं कात्यायनविषयं वेति सर्वमनवद्यं ॥ पक्षांते कर्म अन्वा
धानं ॥ वैश्वदेवः पंचमहायज्ञांतःपाती बलिहरणांतः ॥ पिंडयज्ञः पिंडपितृयज्ञः अनु
पिंडपितृयज्ञस्य पश्चाद्दाक्रियत इत्यन्वाहार्यकं दर्शश्राद्धमिति माधवाचार्यैरि रामः
त्याख्यातं ॥ ननु चतुर्दश्यां युक्ते दर्शे पिंडपितृयज्ञे दर्शश्राद्धे कात्यायनैः कर्त्तव्ये १५
इत्युक्तं ॥ तन्नोपपद्यते ॥ तद्धि तत्ते ज्ञो नाम ब्राह्मणं योस्य राज्ञो कोति व्रतं चरितुं स
मासि मासि पितृभ्यो ददद्यदहरेष पुरस्तान्नोचंद्रमा नो देति तदहर्ददात्येष वै सो
सोमो राजा देवानामन्नं यच्चंद्रमास्तदेतां रात्रिं क्षीयते तस्मिन्क्षीणे देवानामन्नेपि

वक्ष्यो ददातीति ॥ यदेवैष न पुरस्तान्न पश्चाद्ददृशेथ पितृभ्यो ददातीत्यादिशतपथ
श्रुतेः एष चंद्रमा यदहः पुरस्तात्पश्चाच्च न दृश्यते तदहः पितृभ्यो ददातीति कात्याय
नसूत्रस्य च विरोधादिति चेत् ॥ न एतत् श्रुतेरखंडदर्शविषयत्वात् ॥ चतुर्दशी चतुर्या
मा अथवा स्यान्न दृश्यते ॥ अमावास्या प्रतिपद्योगे सा सर्वत्रैव कारयेत् ॥ चतुर्दशी यदा
पूर्णा द्वितीया क्षयगामिनी ॥ चतुरिष्टिमायां स्यान्नैवेक्ष्यादिका क्रिया ॥ पिंडान्वाहा
र्यकं श्राद्धं क्षीणे राजनि स्यते ॥ वासरस्य तृतीयेंशे नातिसंध्यासमीपतः ॥ इति बौ
धायनः ॥ कात्यायनस्मृतिभिस्तथा व्यवस्थापनात् ॥ यत्तु यदा चतुर्दशी यामं तुर
रीयमनुपूरयेत् ॥ अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यत इति कात्यायनवच
नं तदपि न विनिरुद्धं ॥ अमावास्या चतुर्दशी चतुर्थयाममपूरणं कादाचित्कं ॥ क्षी
यमाणात्वं मुख्यं तदपि प्रतिपद्दिने च दर्शनेपि क्षयमज्ञेयं ॥ अन्यथैतत्स्मृतीनां निर्विष
यत्वेन प्रामाण्यापत्तेः ॥ माधवाचार्योप्येवमेवाह ॥ तथाहि आह स्मार्त्तेषां च

नि॰ पा॰ नानामयमर्थः॥ अस्ति चतुर्दशीसंदष्टाप्यस्तमयादर्वागमावास्या वास्तव्या॥ स्तितत रत्न॰
१६ एवापराह्णव्याप्त्यभावाद्द्वयान्वाधानाय वा दूरे तैत्तिरीयाद्यपि निमित्तभावे न भ ३
जेत तथापि प्रतिपद्द्वितीयायां सत्यां चंद्रस्य दृश्यमानत्वात् दर्शने चेष्टिर्निषिद्धत्वा
त्प्रतिपद्युतायाममावास्यायामिष्टिः स्वल्पामावास्योपेतायां केवलायां वा चतुर्दश्या
मन्वाधानश्राद्धादिकं कर्तव्यमिति॥ चंद्रदर्शनदिने चेष्टिं निषेधति वसिष्ठः॥ आदित्ये
ऽस्तमिते चंद्रः प्रतीच्यामुदियाद्यदा॥ प्रतिपद्यतिपत्तिः स्यात्सं च दर्श्यां तदा यजेत्
॥ अतिपत्तिरिष्टिनिवृत्तिः॥ प्रमादात्तु त्र्यागे कृते प्रायश्चित्तमाह कात्यायनः॥ यज राम॰
नीये चेद्धि सोमश्चेद्वारुण्यां दिशि दृश्यते॥ तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातये इ १६
ति॥ यदह्नः पश्चाच्चंद्रमा अभ्युदेति तदहर्यजेन्निर्मो दर्शो कोनेभ्युदेतीति शतपथब्रा
ह्मणं॥ एषवै सुमनानामेष्टिर्यमद्य जानं पश्चाच्चंद्रमा अभ्युदेत्यस्मिन्नेवास्मै लो
के ऋध्नुकं भवतीति तैत्तिरीयब्राह्मणं च यच्चंद्रदर्शनदिने इष्टिं निदधाति तद्बौधायन

कात्यायनव्यतिरिक्तशाखिविषयं॥ एतदेव बौधायनादिमतमुपोद्बलयति तैत्तिरीय
श्रुतिः॥ यस्मिन्नहनि पुरस्तान्न पश्चात्सोमो न दृश्यते तदहर्यजेतेति॥ शतपथश्रुति
रपि यागदिने चंद्रदर्शनमनर्थसाधनमित्याह॥ अद्यामावास्येति मन्यमान उपव
सत्यथैव पश्चाद्ददृशे सेहैषा दिव्याः श्वा स यजमानस्य पशूनभ्यवेक्षते तदपशव्य
ं स्यादिति॥ अस्यार्थः॥ कर्ता अद्यामावस्येति मत्वा व्रतं गृहीत्वा द्वितीयेह्नि यागं क
रोति तद्दिने पश्चिमायां दिशि एष चंद्रमा यदि ददृशे दृश्यते॥ स च चंद्रमाः दिविभवः श्वे
व यजमानस्य पशूनभ्यवेक्षते खादितुमिच्छति तस्मात्तद्दिने यजमानपशुहिंसा स्या
दिति॥ इंदुक्षयकालमाह कात्यायनः॥ अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः
अमावास्याष्टमांशे च पुनः किल भवेदणुरिति॥ चतुर्दश्या अष्टमे प्रहरे इंदुक्षयस्या
प्रारंभः अमावास्यायाः सप्तमे प्रहरे तत्समाप्तिः॥ अष्टमप्रहरे पुनरणुर्भवतीत्यर्थः
देवभाष्यकारोपि चंद्रदर्शनदिने यागं निषिद्धवान्॥ तथाहि॥ सर्वथा यागदिने चंद्र

वि०पा० दर्शनं निषिद्धं॥ द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपच्चापराह्णिकी॥ अन्वाधानं चतुर्दश्यां पर सू०
१७ तः सोमदर्शनादिति बोधायनोक्तेरिति॥ अत्र त्रिमुहूर्त्तव्यापित्वमुपलक्षणं॥ चंद्रद ३
र्शनस्यैव हेतुत्वात्॥ तेनैकमुहूर्त्तद्विमुहूर्त्तसत्त्वेपि प्रतिपद्द्वितीयदिने चंद्रदर्शनं त
तदा यागः पूर्वेद्युस्तु दर्श्यामन्वाधानं पिंडपितृयज्ञो दर्शश्राद्धं च भवतीति परमा
र्थः॥ इदमेवाभिप्रेत्योक्तं कात्यायनेन यजनीयेह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते॥
तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातये इति॥ हेमाद्रावत्र विशेषः॥ यज्ञकालस्ति
थिर्द्वेधे बहुलो यदि लभ्यते॥ पर्वं तत्रोत्तरं ग्राह्यं हीने पूर्वमुपक्रमेत्॥ कलोत्रमु
हूर्त्तं न तु घटिकेति तत्रैवोक्तं॥ वर्द्धमानाममावास्यां लक्षयेदपरेहनि॥ यामांस्त्री रामः
नधिकान्वापि पितृयज्ञस्ततो भवेदिति तस्माद्यं तापचये सत्येव चेतुर्दश्यामन्वा १७
धानादिकार्यं नान्यथेति निर्णीतं॥ अयं निर्णयः॥ साग्नेर्ज्ञेयः॥ निरग्निकादिभि
स्त्वमावास्या कुतपकालव्यापिनी परा ग्राह्या॥ मृतविद्धा च या मावास्या प्रतिपन्मि

श्रितापि वा॥ पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी॥ युक्ता सिनीवाली द्विजैः का
र्या साग्निकैः पितृकर्मणि॥ स्त्रीभिः शूद्रैः कुतः कार्या लिथे वा नग्निकैर्द्विजैरिति लौगा
क्षिणा विशेषोक्तेः॥ अत्र साग्निरौपासनाग्निरपीति मदनपारिजाते उक्तं॥ सिनी
वाल्यादि लक्षणमाह व्यासः॥ दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृता॥ कुतप
स्तु॥ अह्नो मुहूर्त्ता विज्ञेया दश पंच च सर्वदा॥ तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः
स्मृतः इति मात्स्योक्तेः॥ तुलापुरुषादिदानपितृदेवप्रीत्यर्थोपवासादौ परा ग्राह्येति
पूर्वमेवा॥ वोक्तं॥ मृतविद्धा न कर्त्तव्येत्यादिना॥ दर्शे च मासिकवार्षिकादिश्राद्धप्रा
प्तौ कालादर्शे विशेष उक्तः॥ दर्शस्य चोदकुंभस्य दर्शमासिकयोरपि॥ नित्यस्य चा
ब्दिकस्यापि दार्शिकाब्दिकयोरपी सुत्क्रमं॥ स्वंपाते देवताभेदात्पूर्वं युग्मं स
माचरेत्॥ इति॥ अयं च क्रमो निर्णयदीपे उक्तः॥ नष्टचंद्रे मदाकाले क्षयाहं दिवसो
न वेत्॥ वैश्वदेवं क्षयाश्राद्धं कुर्यात्प्राग्दर्शकर्मणः॥ धर्मप्रवृत्तावपि॥ दर्शे प्रत्याब्दि

वि०पा० कं श्राद्धं कुर्याद्दर्शतिथेः परमिति॥ एतदनुपनीतेनापि कार्यं॥ अमावास्याष्टकाकृष्ण स्त०
१८ पक्षपंचदशीषु च॥ एतच्चानुपनीतोपि कुर्यात्सर्वेषु पर्वसु श्राद्धं साधारणं नाम सर्व ३
कामफलप्रदं॥ भार्याविरहितोप्येतत्प्रवासस्थोपि नित्यशः॥ शूद्रोप्यमंत्रकं कुर्याद
नेन विधिना बुध इति मत्स्यपुराणात्॥ इदमामश्राद्धं षड्दैवतं॥ नित्यश्राद्धं तथा दर्शं
षड्दैवं यत्समाचरेदिति हारीतोक्तेः॥ अत्र श्रौताग्निः स्मार्ताग्निः आमान्नवन्नौकर
णं कुर्यात्॥ विधुरस्त्वनग्निको द्विजपाणौ॥ साग्निरनावनाग्निर्द्विजपाणौ वा यथा
सुखं॥ कुर्याद्यौक्तिंयानिरलौकिकेनेति निश्चितमिति वा॥ कृतोद्वाहस्य यस्त्व
स्वीकृतौपासनाग्निस्तथा॥ समुच्छिन्नाग्निस्तथा भार्याविधुरस्तथानग्निरहितस्त रामः
स्य द्विजपाणौ जले वा होमो भवतीति हेमाद्रिव्याख्यानात्॥ इदं श्राद्धं नित्यं॥ अमावा १८
स्याव्यतीपातपौर्णमास्यष्टकासु च॥ द्विजः श्राद्धमकुर्वाणः प्रायश्चित्तीयते हि
स इति गार्ग्यस्मृतेः॥ प्रायश्चित्तमुक्तं ऋग्विधाने न्यूषुवाचं जपेन्मंत्रं शतवारं दिने दिने॥

अमाश्राद्धं यदा नास्ति तदा संकल्पमिति तन्न॥ दैवे श्राद्धं द्विजातिभिरन्नेनैव कार्यं॥ द
र्शश्राद्धं गयाहं च अन्नेनैव समाचरेदिति हारीतोक्तेः असंभवे त्वामहेमभ्यामपि
कार्यं॥ नित्यत्वात्॥ इत्यनंतभट्टकृते विधानपारिजाते पंचदशतिथिनिर्णयः॥ अ
थ नक्तं॥ तच्च दिनानशनपूर्वं रात्रिभोजनरूपं॥ तत्र प्रदोषव्यापिनी तिथिर्ग्राह्या॥
प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदेति वत्सोक्तेः॥ प्रदोषस्तु त्रिमुहूर्तः॥ प्रदोषः
स्याद्दिनावस्तंगते सति॥ नक्तं तत्र तु कर्तव्यमिति शास्त्रविनिश्चय इति व्यासोक्तेः
॥ तत्रापि भाद्यं त्रिदंडं वर्ज्यं॥ तत्र चत्वारि कर्माणि संध्यायां परिवर्जयेत्॥ आहा
रं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति मार्कंडेयेन भोजननिषेधात्॥ सायंसंध्या त्रि
घटिकास्तमयादुपरि भास्वत इति स्कांदे दंडत्रयस्य संध्यात्वात्॥ सायंकाले नक्तं
॥ तु दिनद्वये प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते॥ आत्मनो द्विगुणा छाया म
दीभवति भास्करे॥ तन्नक्तं नक्तमित्याहुर्न नक्तं निशिभोजनमिति स्कांदात्॥ यत्तादी

वि॰ पा॰ नामिदेवा॥ यतिश्च विधवा चैव कुर्यात्तं सदिवाकरमिति माधवीये स्मृतेरिति तिथिकृत्यं॥ अ स्मृ॰
थ नक्षत्रादिव्रतनिर्णयः॥ तत्र माधवाचार्यः॥ यस्मिन्नस्तमियाद्भानुस्तन्नक्षत्रमुपोष ३
१९ णो॥ मुख्यं तस्यासंभवे तु गृहीतव्यं निशीथयुक्तं॥ उपवासे यदृक्षं स्यात्तद्दिनैककर्मयोः
॥ उदये त्रिमुहूर्तस्थं नक्षत्रं व्रतदानयोः॥ दिनद्वये तथाप्ये तु पूर्वं स्यादुल्लवत्यतः॥ श्रव
णं तूत्तरं ग्राह्यमुपाकरणकर्मणि॥ पित्र्ये तु तिथिवत्सर्वो नक्षत्रस्य विनिर्णयः॥ पूर्वः
स्यादुपवासादौ तूत्तरो व्रतदानयोः॥ योगः श्राद्धकर्मकालव्याप्तस्तु परिगृह्यते॥ कर
णं यदि ते तत्तु ग्राह्यं रात्रौ यदा तदा॥ दिनद्वये कर्मकाभ्यामुपवासः प्रसिद्ध्यति॥ वारे
षु संज्ञाया भावात्क्षीहीतव्यं पथ्यास्थितं॥ इति॥ अथ संक्रांतिनिर्णयः॥ स त्वाह॥ आस रामः
र्जनाद्यः संक्रांतेः पुण्यस्नानादिकर्मसु॥ चरेषु कर्कटे पूर्वं मकरे विंशतिः परा॥ व १९
र्त्तमाने तुलामेषे नाड्यस्तूभयतो दश॥ वृषभादौ स्थिरपुण्याः प्राक्पश्चादपि षोड
शा॥ मिथुनादौ द्विःस्वभावे तूत्तराः षष्टिनाडिकाः॥ अह्नः संक्रमणे रात्रावनुष्ठाननिषेधतः॥

उक्तौ कालौ व्यवस्थाप्यौ तद्वदूर्ध्वं पश्चिमौ॥ रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदान
योः॥ अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया॥ अर्द्धसंक्रमणे चोर्द्ध्वमुदयात्प्रहरद्व
यं॥ पूर्णे दिने धरात्रे तु यदा संक्रमते [illegible] रविः॥ प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकर
कर्कटौ॥ कर्कटे मकरे रात्रौ पथ्याचारादनुष्ठितिः॥ चरे स्थिति॥ मेषादिचतुर्षु राशित्रि
केषु प्रथमाश्चत्वारश्चरसंज्ञाः॥ मध्यमाः वृषभादयः स्थिराः॥ मिथुनाद्याः द्विःस्व
भावाः॥ तेषु सर्वेषु यथोक्ते तया विंशत्यादि संख्यायां पुण्यकालावधिरधीयत इत्यर्थः
संक्रांतिषु कार्यविशेषो हेमाद्रौ॥ मेषे गोवस्त्रधान्यं च घृतयेनु स्तथैव च॥ स सुव
र्णां धेनुदानं ते वृषभनां दानमेव च॥ गोरसादीप मांलाच वस्त्राणि वाहनानि च॥ को
ष्टमेव तु तथा स्थानं मेषादिषु यथाक्रमं॥ श्राद्धं संक्रमणे भानोः प्रशस्तं पृथिवीपत
इति विष्णुधर्मोत्तरात्॥ अथ प्रसंगात्सर्वमन्वादिनिर्णय उच्यते॥ कालनिर्णयदी
पिकायां॥ ॥ तिथ्यग्नीनातिथिस्तिथ्याशैलक्ष्मेभोनलोग्रहः॥ तिथ्याकेनिशिवोऽप्यो

वि॰ पा॰ मातिथी मन्वादयो मध्योरिति ॥ अन्यार्थः ॥ तिथिः पंचदशी फाल्गुनि ॥ अग्नीस्तृतीया ॥ स्त॰

२० नेति वैशाखेन । सती स्यर्थः ॥ आषाढ दशमी ॥ कृष्णमः कृष्णाष्टमी ॥ अनलस्तृतीया ॥ ३

सहो नवमी ॥ ऊर्के द्वादशी ॥ शिवराका दशी ॥ अघः सप्तमी ॥ अमा अमावास्या ॥ म

धौ श्रेत्राषाढारभ्य क्रमेणैता मन्वादय इत्यर्थः ॥ एता मन्वादयः शुक्लपक्षस्थाः पौ

र्वाह्णिका ग्राह्याः ॥ कृष्णपक्षस्था आपराह्णिका ग्राह्याः पूर्वास्तु सदा ग्राह्याः

शुक्लामनुयुगोदयः ॥ दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिका इति गरुडपुराणा

त् ॥ तृतीया माघ वैशुक्ला नवम्यूर्जे त्रयोदशी ॥ कृष्णा नभस्ये माघे मा कृतादेर्यु रामः

गादयः ॥ द्वि शुक्ले द्वे तथा कृष्णे युगादीः कवयो विदुः ॥ शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे २०

चैवापराह्णिके इति हेमाद्रौ स्मृतेश्च ॥ अत्र च श्राद्धमुक्तं ॥ मत्स्यपुराणे ॥ कृतं

श्राद्धं विधानेन मन्वादिषु युगादिषु ॥ हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेदि

ति ॥ हायनानि वर्षाणि ॥ हायनोऽस्त्री शरत्समा इत्यभिधानात् ॥ मन्वादिश्राद्धमत

मासे स्वतिसैमोद्वयेपि कार्यं ॥ मन्वादिकं तैथिकं च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रि

कोक्तेः ॥ इदं श्राद्धमपिंडकं ॥ तदुक्तं कालादर्शे ॥ विषुवायनसंक्रांतिमन्वादिषु युगादिषु

॥ विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेदिति ॥ इदं श्राद्धं नित्यं ॥ अकरणे प्रायश्चि

त्तश्रवणात् ॥ तदुक्तं मन्वर्थविधाने ॥ स्वायंभुवः प्रतिमंत्रं च शतवारं जले जपेत् ॥ मन्वाद्यो

यदा न्यूनाः कुरुते नैव वापि य इति ॥ एवं यत्र यत्र प्रायश्चित्तवीप्सादिदर्शनं तानि

षण्णवति श्राद्धानि नित्यानीति ज्ञेयं ॥ तानि तु ॥ अमा मनु युग क्रांति धृति पात महालयः

। अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिता इति वचनसिद्धानि ॥ चकारादष्टका ग्रा

ह्याः ॥ इति मन्वादिनिर्णयः ॥ अथ ग्रहणविधानं ॥ भार्गवार्चनदीपिकायां मेधाति

थिः ॥ आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितं ॥ मणिकस्थोदकं चैव न दुष्ये

द्राहुसूतके इति ॥ मन्वर्थमुक्तावल्यामपि ॥ अन्नं पक्वमिह त्याज्यं स्नानं सवसनं ग्रहे

॥ वारितं क्षारनालादि तिलदर्भैर्न दुष्यति ॥ ग्रहे ग्रहणे इत्यर्थः ॥ जलेल्वेदाश्री बोगांग

वि॰पा॰ विषयः॥ ग्रहोषितं तु जलं पीत्वा पादकृच्छ्रं समाचरेदिति मन्वर्थमुक्तावल्यामेव चतुर्विंशति स्त॰
२१ मतवचने नान्यत्र जलपाने प्रायश्चित्तोक्तेः॥ वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलं॥ न व ३
र्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलमिति नारदोक्तेश्च॥ निर्णयदीपे॥ तत्र सर्वोपि वर्णः
सूतकी भवति॥ तथा वृद्धवसिष्ठः॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने॥ सचैलं
च भवेत्स्नानं शृतमन्नं विवर्जयेत्॥ शृतं पक्वं॥ अपक्वे तु दोषो नास्ति॥ दधिदुग्धघृता
मांस्येषु लवणे सारयेत्तथा॥ ग्रहणावकुं क्षिपेद्दर्भं ततो मुक्ते न दुष्यतीति॥ ग्रहणे
कालविशेषे तीर्थविशेषोऽभिहितो देवीपुराणे॥ मार्गे तु ग्रहणं वैदिकायां महामुने॥
पौषे तु नर्मदा पुण्या माघे संनिहिता शुभा॥ फाल्गुने वरुणा पुण्या चैत्रे पुण्या सर रामः
स्वती॥ वैशाखे चंद्रभागा च ज्येष्ठे पुण्या च कौशिकी॥ आषाढे तापिका पुण्या सिंधु २१
र्वै श्रावणे तथा॥ भाद्रे वै गंडकी श्रेष्ठा आश्विने शरदूस्तथा॥ कार्तिके ग्रहणं श्रेष्ठं
गंगायमुनसंगमे इति॥ तथा नक्षत्रविशेषे ग्रहणे फलं॥ गर्गः॥ ज्येष्ठे शात्स्यं तथा मे

त्रं प्राजेशं वासवं तथा॥ वैष्णवं वैश्वदेवं च पुरुहूतस्य मंडलं॥ मंडलेस्मिन्समुत्पन्ने
ग्रहणे जगतां शुभं॥ आनंदः सर्वभूतानां वृष्टिश्चैव विशेषतः॥ तिष्यमाजपदं चैव पा
ष्यं भाग्यं च पैतृकं॥ रौद्रमग्निदैवं च सह तेस्य न लोगता॥ आग्नेये मंडले दृष्टे ग्र
हणं रविसोमयोः॥ राज्ञो भयकरं विद्यात्सज्जानां बहुदोषहेतुः॥ आहिर्बुध्न्यं तथा पौ
ष्णं मूलमाप्यं च शांकरं॥ वारुणं सार्पदैवत्यं वारुणं मंडलं स्मृतं॥ एतस्मिन्नुप
रागे स्यान्मंडले सोमसूर्ययोः॥ दुर्भिक्षामयनाशस्तु प्रजानामिति निश्चयः॥ कृ
त्तिका चार्यमादीनि चत्वारि च पुनर्वसू॥ सौम्यं चैवाश्विदैवत्यं वायव्यं मंडलं स्मृ
तं॥ समरं स्वन्नयं चैव दुर्भिक्षं कुरुते चिरात्॥ व्याधिशस्त्रादिकोपः स्यान्मंडले॥ स्मि
न्नुपप्लव इति॥ एतेषु मंडलेषु ग्रहणे राज्ञा तत्तद्देवतापूजाहोमजपादिरूपा शांतिः का
र्येति काश्यपेनोक्तेः॥ आग्नेयीं कारयेच्छांतिं शांतिं कुर्याच्च वारुणीं॥ वायव्यां
शांतिमिच्छेत माहेंद्रीं तत्र कारयेत्॥ इति जन्मराश्यादिषु ग्रहणफलमुक्तं॥ ग्रहणे॥

वि॰पा॰ जन्मोसमाष्टरिःफांकदशामस्थैदिवाकोनिशाकरेशनिश्चचिस्यात्ः॥दशोरिष्टप्रदोराहुर्ज स्त॰
२२ न्मर्क्षेनिधनेपिच॥रिःफोद्वादशोराशिः॥अंकोनावमः॥जन्मर्क्षंजन्मतारा॥निधनंस ३
प्तमीतारा॥तथा॥मासान्ततीयोष्टमगश्चतुर्यस्तथा॥यंसंस्थःशुभदःस्वराशिः॥
धर्मांत्यधीसप्तमगश्चमध्यःपूज्योद्विषकोदशामस्तथाद्यः॥आयैत्वकादशराशिः॥
धर्मोनिवमः॥अंत्योद्वादशः॥धीःपंचमः॥द्विःद्वितीयः॥षट्कः॥षष्ठ॥आद्योजन्मराशिः॥
॥अत्राद्यस्योत्तमत्वमधमत्वंचद्रष्टव्यं॥वचनात्॥तथा॥होरायांग्रस्तेयस्यन
क्षत्रेवानिशाकरः॥प्राणासंदेहमाप्नोतियद्वामरणमृच्छति॥होरायांजन्मलग्ने॥ राम:
तथा॥अभिभवतिसैंहिकेयश्चंद्राकौयस्यजन्मनक्षत्रे॥तस्यांतकारिजभयंवि २२
द्यादुर्गांमनस्तापं॥अंतेकाउमृत्युःअरिर्गिरेत्रः तज्ज्ञान्यंभयमित्यर्थः॥तथा॥यस्य
त्रिजन्मनक्षत्रेग्रस्येतेशशिभास्करौ॥तज्ज्ञातेषांभवेत्पीडायेनराशांतिवर्जि
ताः॥ज्योतिर्निबंधेपि॥संक्रांतिरयनादीषांजन्मत्रिलयेष्ववाहिसंस्थग्रीः॥बहुरो

गमृत्युजननोदानाकृतयोजपश्चकर्त्तव्याः॥जन्मत्रितये॥जन्मदशमैकोनविंशतारासु॥
अहिःराहुः॥जन्मराशौग्रहेतद्दोषनिबर्हणायशांति॥रुक्मोहेमाद्रौशांतिकांडेमत्स्य
पुराणे॥यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः॥तस्यस्नानंप्रवक्ष्यामिमंत्रौषधि
समन्वितं॥चंद्रोपरागेसंप्राप्तेकृत्वाब्राह्मणवाचनं॥संपूज्यचतुरोविप्रान्शुक्लमा
ल्यानुलेपनैः॥पूर्वमेवोपरागस्यसमानीयौषधादिकं॥स्थापयेच्चतुरः॥कुंभा
नग्रतः॥सागरानिव॥गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥राजद्वा
रप्रदेशाच्चमृदमानीयनिक्षिपेत्॥पंचगव्यंपंचरत्नंपंचत्वक्स्यपल्ल
वं॥रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनं॥शुक्तिस्फटिकतीर्थांबुसितसर्षप
गुग्गुलून्॥मधुकंदेवदारुंचविष्णुक्रांताशतावरी॥बलांचसहदेवींचनिशाद्वि
तयमेवच॥एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरान्॥सर्वेसमुद्राःसरितस्ती
र्थानिजलदानदाः॥आयांतुयजमानस्यदुरितक्षयकारकाः॥योसौवज्रधरोदे

वि० पा० रक्षआदित्यानां प्रभुर्मतः॥ सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु॥ मुखं यः सर्वदेवा स्त०
२३ नां सप्तार्चिरमितद्युतिः॥ चंद्रोपरागसंभूतामग्निः पीडां व्यपोहतु॥२॥ यः कर्मसा ३
क्षी लोकानां धर्मो महिषवाहनः॥ यमश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु॥३॥ रक्षो
गणाधिपः साक्षी नीलांजनसमप्रभः॥ खड्गहस्तोतिभीमश्च ग्रहपीडां व्यपोहतु॥
४॥ नागपाशधरो देवः सदा मकरवाहनः॥ स जलाधिपतिश्चंद्रग्रहपीडां व्यपो
हतु॥५॥ प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः॥ वायुश्चंद्रोपरागोत्थां ग्र
हपीडां व्यपोहतु॥६॥ योसौ निधिपतिर्देवः खड्गशूलगदाधरः॥ चंद्रोपरागकलु राम।
षं धनदोत्र व्यपोहतु॥७॥ योसौ विंदुधरो देवः पिनाकी वृषवाहनः॥ चंद्रोपरागे २३
पापानि स नाशयतु शंकरः॥८॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥
ब्रह्मविष्ण्वर्करुद्राश्च दहंतु मम पातकं॥९॥ विश्वोत्तरस्थानि भूतानि पवित्राणीत
राणि च॥ तानि सर्वाणि चंद्रोपप्लवदोषं दहंतु मे॥१०॥ एवमावाहयेद्देवान्मंत्रैरे

भिश्च वारुणैः॥ वारुणैरिमं मे वरुणेत्यादिभिः॥ एतानेव तथा मंत्रान् चरणपिंडे विलेख
येत्॥ ताम्रपट्टे तथा वा लिखेन्नवकेन वा पुनः॥ मस्तके यजमानस्य निदध्युस्ते हि
जोत्तमाः॥ कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्॥ गृहीत्वा स्नापयेद्भद्रं
भद्रपीठोपरिस्थितं॥ ग्रहणादर्शनं यथा न भवति तथा छत्रादिना कृतेव्य
वधानं॥ एवं कृते एवं त्रैस्तु यजमाने द्विजोत्तमाः॥ अभिषेकं ततः कुर्युर्मंत्रैर्वारु
णैस्तु के॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥ आचार्यं वरयेत्तत्रा स्व
र्णपट्टं निवेदयेत्॥ अग्रवरुणादर्जनं॥ कर्मादौ वरणस्य कृतत्वात्॥ आचार्ये द
क्षिणां दद्यात् गोदानं च स्वशक्तितः॥ पूजयेद्बहुगोदानैर्ब्राह्मणान्पि शक्तितः॥
होमं चापि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा॥ निवृत्ते ग्रहणे सर्वं ब्राह्मणेभ्यो
निवेदयेत्॥ दानं च शक्तितो दद्यात्सकीदृ दात्मनो हितं॥ स्वयं गृहे सदा स्वयंना
मम मंत्राश्च कीर्त्तयेत्॥ एवं कृते श्लोकेषु चंद्रपदस्थाने सूर्यपदं प्रक्षिप्य पठेत्॥

अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत्॥ न तस्य ग्रहणे दोषः कदाचिदपि जायते॥ स्न०
२४ इति॥ पृथ्वीचंद्रोदये तु प्रकारांतरे शांतिरुक्ता॥ पुराणसमुच्चये॥ सूर्यस्य संक्र ३
मो वापि ग्रहणे चंद्रसूर्ययोः॥ यस्य त्रिजन्मनक्षत्रे तस्य रोगोऽथवा मृतिः॥ तस्य दाने
च होमं च देवार्चनजपौ तथा॥ उपरागाभिषेकं च कुर्याच्छांतिर्भविष्यति॥ स्वर्णेन वा
प्यपिष्टेन कृत्वा सर्पस्य चाकृतिं॥ ब्राह्मणाय ददेत्तस्य न रोगादिभयं ततः॥ सर्पा
स्य॥ तदाकारस्य राहोरित्यर्थः॥ अमृते सागरि भार्गवः॥ यस्य राज्यस्य नक्षत्रे स्वा
र्भानुरुपरज्यते॥ राज्यभंगं सुहृन्नाशं मरणं चात्र निर्दिशेत्॥ राज्यस्य नक्षत्रे राज्ञो रामः
भिषेकनक्षत्रं॥ ज्योतिःसारेपि॥ सौवर्णं कारयेन्नागं पलेनाप्यपलार्द्धतः॥ तद २४
र्द्धेन तदर्द्धेन कर्णार्थं मौक्तिकं न्यसेत्॥ ताम्रपात्रे निधायाथ घृतपूर्णे विशे
षतः॥ कांस्यं वा कांतिलोहं वा न्यस्य दद्यात्सदक्षिणं॥ चंद्रग्रहे तु रूप्यस्य बिंबं द
द्यात्सदक्षिणं॥ नागं रुक्ममयं यद्वा बिंबं च हेमजं॥ तुरंगरथगोभूमितिलस

र्पिश्च कांचनं॥ कालविवेकेपि॥ सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनं॥ सदक्षिणं
सवस्त्रं च ब्राह्मणाय निवेदयेत्॥ दानमंत्रः॥ तमोमय महाभीम सोमसूर्यविमर्द
न॥ हेमताराप्रदानेन मम शांतिप्रदो भव॥ विधुंतुद नमस्तुभ्यं सिंहिकानंदन प्रभो॥ दाने
नानेन नागस्य रक्ष मां वेधजाद्भयात्॥ एवमन्या अपि शांतयः संति विस्तरभिया
नोच्यंते॥ अत्रानुष्ठेयक्रमो माधवीये॥ ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधी
यते॥ मुच्य— ने भवेद्दानं मुक्ते स्नानं विधीयते॥ चतुर्विंशतिमतेपि॥ मुक्तौ यस्तु
न कुर्वीत स्नानं ग्रहणसूतके॥ स सूतकी भवेत्तावद्यावत्स्यादपरो ग्रहः॥ इदं
स्नानमंत्रमिति रत्नाकरः॥ व्यासः॥ इंदोर्लक्षगुणं पुण्यं रवेर्दशगुणं तथा॥ गंगा
तोये तु संप्राप्ते इंदोः कोटी रवेर्दश॥ गवां कोटिसहस्रस्य यत्फलं लभते नरः॥ त
त्फलं लभते मर्त्यो ग्रहणे चंद्रसूर्ययोः॥ गंगाया असंभवे शंखः॥ वापीकूपतडा
गेषु गिरिप्रस्रवणेषु च॥ नद्यां नदे देवखाते सरसीषूद्धृतांबुनि॥ उष्णोदकेन वा

वि० पा० स्नायाद्ग्रहणे चंद्रसूर्ययोः॥ अत्र तारतम्यमाह मार्कंडेयः॥ शीतमुष्णोदकात्पुण्यमपा स्त०
२५ रक्यं परोदकात्॥ भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं॥ ततोपि सारसं पुण्यं तत ३
तः पुण्यं नदीजलं॥ तीर्थतोयं ततः पुण्यं महानद्यंबु पावनं॥ ततस्ततोपि गंगांबु पुण्यंत
स्ततोम्बुधिरिति॥ अम्बुधिस्नानमपि पर्वण्येव॥ तथाहि भारते॥ अश्वत्थसागरौ सेव्यौ
न स्प्रष्टव्यौ कदाचन॥ अश्वत्थं मंदवारे तु सागरं पर्वणि स्पृशेत्॥ उष्णोदकमातुर
स्य॥ उष्णोदकेन वै स्नानमातुरस्य सदा भवेदिति स्मृतेः॥ ग्रहणे तीर्थासंभवे यत्र
क्वापि जले स्नायादेव॥ सर्वं गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः॥ सर्वदानं स्वर्ण राम:
समं राहुग्रस्ते दिवाकर इति विष्णूक्तेः॥ अत्र स्नानोत्तरं तर्पणं श्राद्धमपि कार्यं॥ त २८
दाह व्यासशृंगः॥ चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्॥ तेनैव सकला पृथ्वी
दत्ता विप्रस्य वै करे॥ भारते॥ सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने॥ अकुर्वाण
स्तु नास्तिक्यात्पंके गौरिव सीदति॥ विष्णुः॥ राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं॥

इति तच्चामेन हेम्ना वा कार्यं॥ न तु पक्वान्नेन॥ आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा॥
आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति हेमाद्रौ॥ शातातपोक्तेः॥ अपत्नीकस्तु द्विजा
नां पाकाभावे त्वामश्राद्धमित्याह॥ पाकाभावे द्विजातीनामामश्राद्धं विधीयत इति सु
मंतूक्तेः॥ तथा॥ सैंहिकेयो यदा राहुर्ग्रसते पर्वसंधिषु॥ गजच्छाया तु सा प्रोक्ता तस्यां
श्राद्धं प्रकल्पयेत्॥ घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेदिति वायवीयोक्तेः॥ प्र
।विज्ञानेश्वरोप्याह॥ ग्रहणश्राद्धभोक्तुर्दोषो दातुस्त्वभ्युदय इति॥ सूतके मृतके तु
क्ते ग्रहीते शशिभास्करे॥ छायायां हस्तिनश्चैव नभस्यः पुरुषो भवेदिति यापस्तं हा
बेन न भोजननिषेधाच्च॥ अयं च निषेधः श्राद्धभोजनस्य॥ हस्तिच्छायास्वाहुचर्यात्॥
अत्र चेद्देशाचारतो व्यवस्था द्रष्टव्या॥ अत्र ग्रहणनिमित्तकश्राद्धं नैवामासंक्रांत्यादि
श्राद्धसिद्धिः॥ दर्शिकालभ्ययोरपीति कालादशौचोक्तेः॥ अत्राशौचसम्भवेपि स्नानश्रा
द्धादिकार्यमेवा सूतके मृतके चैव न दोषो राहुदर्शने॥ तावदेव भवेच्छुद्धिर्यावन्मुक्ति

वि०पा० र्द्दृश्यत इति माधवीये वृद्धवसिष्ठोक्तेः॥ स्नानं कर्मपरित्यागो राहोरन्यत्र सूतक इति स्म०
२६ व्याघ्रपादोक्तेश्च॥ इयं च शुद्धिरविरोधान्मंत्रदीक्षापुरश्चरणादिसर्वस्मार्तकर्मवि ३
षया॥ रजस्वलाया अपि स्नानाद्यधिकारः॥ न सूतकादिदोषोस्ति ग्रहे होमजपादिषु॥
ग्रस्ते स्नायादुदक्यापि तीर्थादुद्धृतवारिणेति स्मृत्यर्थनिबंधोक्तेः॥ स्नाने नैमित्तिके
प्राप्ते नारी यदि रजस्वला॥ पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेदिति मिताक्षरो
क्तेः॥ स्नानविधिर्द्रष्टव्यः॥ तथा ग्रहणे रात्रावपि स्नानश्राद्धादिकार्यं ग्रहणोद्वाह
संक्रांतियात्रार्त्तिप्रसवेषु च॥ दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यत इत्यपरार्के रामः
व्यासोक्तेः॥ चंद्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यत इति देवलस्मृतेश्च॥ यदा च २६
ज्योतिःशास्त्रागम्योदिने चंद्रग्रहो रात्रौ च सूर्यग्रहस्तदा स्नानादि न कार्यं॥ सूर्य
ग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा॥ तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदि
ति षड्त्रिंशन्मतोक्तेः॥ ग्रहणादिने वार्षिकि श्राद्धप्राप्तौ तु प्रयोगपारिजाते गोभिलः॥

दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितं॥ अन्नेनासंभवे हेम्ना कुर्यादामेन वा तु सुतर
ति॥ अत्र दर्शरविपितृसुतशब्दाः प्रदर्शनार्थाः॥ न्यायसाम्यात्॥ तेन चंद्रग्रहणेपि
सपिंडादिवार्षिकश्राद्धमन्नादिना तद्दिन एव कार्यमिति मदनपारिजाते व्याख्या
तं॥ यत्तु॥ आमश्राद्धं प्रकुर्वीत मासः संवत्सरादते इति॥ अन्नेनैवाब्दिकं कुर्याद्धे
म्ना वामेन न क्वचिदिति मरीचिलौगाक्ष्यादिवचनं तद्ग्रहणादिनातिरिक्तविषय
मिति निर्णयामृतोक्तिः॥ यानि तु॥ ग्रहणात्तु द्वितीयेन्हि रजोदोषात्तु पंचमे॥ तथा॥
ग्रस्तोदये यदा चंद्रे प्रत्यब्दं समुपस्थितं॥ तद्दिने चोपवासः स्यात्प्रत्यब्दं तु परेहनि॥
तथा॥ अस्तात्वे वास्तमानं तु रवींदू प्राप्नुतो यदि॥ प्रत्यब्दं तु तदा कार्यं परेहन्येव स
र्वदा॥ तथा॥ चंद्रसूर्योपरागे च तथा श्राद्धं परेनीत्यादीनि वचनानि तानि महानिबं
धेषु क्वाप्यनुपलंभान्निर्मूलानि॥ स्वमतेप्युच्चैवादेशाचारतो व्यवस्थाज्ञेया॥ कौर्मे॥
॥ स्वस्वेष्टदेवनामंत्र जपं कुर्यात्प्रयत्नतः॥ चंद्रसूर्योपरागे तु मालिन्यमजपाहवेदि

वि० पा० २७

यतोऽत्र पक्षः॥ अत्र प्रसंगाद्दीक्षाकालः कथ्यते॥ ग्रहणादिसप्तदिनपर्यंतं कुर्यात्॥ स्म०
मंत्राद्यारंभणं कुर्याद्ग्रहणे चंद्रसूर्ययोः॥ ग्रहणं ह्यपि विशेषकालाः॥ सप्तदिनावधी दे ३
तिरित्याचं निचंद्रिकोक्तेः॥ रत्नसागरेपि॥ सतीर्थेर्के विधुग्रासे तंतुदानमयं वर्तितं॥
मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत्॥ अत्र रविग्रहो मुख्यः॥ सूर्यग्रहण
काले तु नान्यदन्वेषितं भवेत्॥ सूर्यग्रहणकालेन समो नान्यः कदाचन॥ न मा
सतिथिवारादिशोधनं स्यदपेक्षितमिति॥ अथ ग्रहणे भोजननिषेधः॥ प्रदर्श्यते॥ वेथे
तत्र चंद्रोपरागे यस्मिन्यामे ग्रहणं भवति तस्मात्पूर्वं प्रहरत्रयं न भुंजीत॥ सूर्य रामः
ग्रहणे तु प्रहरचतुष्टे न भुंजीत॥ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं॥ चंद्र २७
ग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विनेति माधवीये वृद्धपाराशरस्मृतेः॥ तथा॥ ग्रह
णं तु भवेद्विंद्रोः प्रथमादधियामतः॥ भुंजीतावर्त्तनात्पूर्वं प्रथमे प्रथमादध इति
मार्कंडेयोक्तेश्च॥ आधिरत्नोद्धृपिकः॥ न तु चंद्रग्रहे यामचतुष्टयनिषेध उचितो
न तु सूर्यग्रहे॥

सूर्योदयात्प्राग्भोजनाप्राप्तेः॥ मैवं॥ वचनस्य प्रथमप्रहरे सूर्यग्रहे सति पूर्वेद्युः पूर्वरा
त्रे भोजननिषेधपरत्वात्॥ चंद्रग्रहे विशेषमाह वृद्धवसिष्ठः॥ ग्रस्तोदये विधोः पूर्वं ना
हर्भोजनमाचरेदिति॥ द्वयोर्ग्रस्तास्ते तु व्यासः॥ अमुक्तयोरस्तगयोरद्याद्दृष्ट्वा परेऽह
नीति॥ विष्णुधर्मेपि॥ अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा॥ मुक्तिं दृष्ट्वा तु भोक्त
व्यं स्नानं कृत्वा ततः परं॥ अत्राहोरात्रनिषेधः सूर्यग्रस्तास्ते॥ तदनाहिताग्निविष
यं॥ अपराह्णे व्रतोपायनीयमश्नीतेति कात्यायनोक्तेर्व्रतस्य श्रौतत्वेन प्राबल्या
त्॥ आद्रिव्रतेत्तदा कुर्यादिति निर्णयदीपकृत्॥ बालवृद्धातुराणां तु ग्रहणे सामा
स्सर्वमेकयामो निषिद्धः॥ सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनं॥ अपराह्णे न म
ध्याह्ने मध्याह्ने न तु संगवे॥ भुंजीत संगवे चेत्स्यान्न पूर्वं भोजनक्रियेति मार्कंडेयो
क्तेः॥ संक्रांतौ॥ निद्रायां जायते व्याधिर्मूत्रे दारिद्र्यमाप्नुयात्॥ पुरीषे कृमियोनिः स्या
न्मैथुने ग्रामसूकरः॥ अभ्यंगे च भवेत्कुष्ठी भोजने स्यादधोगतिः॥ बंधने च भवेन्स

वि॰पा॰ पौविधे च नरकं व्रजेत्॥ पत्रदारुत्तरां पुष्पं त्रागं केनैवाहरेत्ततरति॥ वेधकाले महताम स स्त॰
२८ मये वा भोजने प्रायश्चित्तं मुक्तं माधवीये कात्यायनेन॥ चंद्रसूर्यग्रहे भुक्त्वा प्राजाप ३
त्येन शुद्ध्यति॥ तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुद्ध्यतीति॥ तथा॥ एकरात्रं त्रिरा
त्रं वोपोष्य श्रेयोर्थिभिर्ग्रहणस्नानं कार्यमित्युक्तं लिंगपुराणे॥ एकरात्रमुपोष्यै
वं स्नात्वा दत्त्वा च शक्तितः॥ कंचुकादिव सर्पस्य निवृत्तिः पापकेशितः॥ त्रिरात्रं स
मुपोष्यैव ग्रहणे चंद्रसूर्ययोः॥ स्नात्वा दत्त्वा च विधिवन्मोदते ब्रह्मणा सह॥ इदं
च पुत्र्यतिरिक्तविषयं॥ आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ पारणं चो राम:
पवासं च न कुर्यात्पुत्रवान्॥ गृहीति जैमिनिस्मृतेः॥ यदा तु रवेर्ग्रस्तास्तस्तदा पुत्रि २८
णः प्रहरद्वयं हित्वा बालादिवद्भोजनं॥ न तूपवासः॥ सायाह्ने संगवे र्क्षीयाद्धुर
दे संगवादधः॥ मध्याह्ने परे तो श्रीयान्नोपवासो रविग्रहे इति हेमाद्र्युक्तेः॥ शारदः
अपराह्णः॥ माधवाचार्यस्तु पुत्रिणोप्युपवासं मन्यते॥ अहोरात्रं न भोक्तव्यं चं

द्रसूर्यग्रहे यदि निषेधोक्तिनिषेधस्य तेनापि पालनीयत्वात्॥ उपवासनिषेधस्तु ग्र
तरूपोपवासपरः॥ किंचिद्भक्ष्यपरो वेति ज्ञेयः॥ उपवासनिषेधे तु किंचिद्भक्ष्य
प्रकल्पयेदिति वसिष्ठोक्तेः॥ ग्रहणे गर्भिणीनां विशेषोभिहितो वत्समलसिंहांते॥ स
र्वैः पटस्थितं वीक्ष्यं स्वच्छं तैलादिषु पर्वणि॥ ग्रहणं गुर्विणी जातु न पश्येत पटं विना
॥ तथा॥ मंगलकृत्येषु वेधविशेषो हेमाद्रौ॥ त्रयोदश्यादितो वर्ज्यं दिनानां नवकं
ध्रुवं॥ मंगलेषु समस्तेषु ग्रहणे चंद्रसूर्ययोः॥ प्रकरांतरं चोक्तं तत्रैव॥ द्वादश्या
दितृतीयांतो वेध इंदुग्रहे स्मृतः॥ एकादश्यादिकः सौरे चतुर्थ्यंत प्रकीर्तितः॥ र
द्वं संपूर्णग्रासे द्रष्टव्यं॥ अर्धग्रासे तु ग्रहे तयोरिति तत्रैवोक्तिः॥ तथा॥ नित्ये नैमि
त्तिके जाप्ये होमयज्ञक्रियासु च॥ उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते इति॥ हे
रेदमपि प्रारब्धनित्यकर्मविषयं॥ अन्यत्र॥ ग्रहणोद्यानमंत्या उमंगलषु क्रतुत्रयं
यावज्ज्वरविरामे मुक्तेमुक्ते मंदग्धकाष्ट च तत्॥ ग्रहणप्रसंगात्कुरुक्षेत्रे दानविधिरु–

वि॰ प्रा॰ अगस्त्यचारणात्पूर्वं तु राजाधिराजमंत्रतः॥ कौबेरीं स्वर्णप्रतिमां दद्यात्सूर्यग्रहे बुधः॥ स्तं॰
२९ मंत्रस्तु॥ उत्तराशापते देवा कुबेर नरवाहन॥ ग्रहपापमनिधीनां त्वं पते श्रीकेरव ३
स्त्रमा॥ अद्यनाद्येष्ट यत्पापं तदारिष्टं मम दुःखदं॥ तत्सर्वं मे दानेन पापमाशु विना
न्नायेति॥ फलं तु॥ त्रयोदशगुणा वृद्धिस्त्रयोदशादिनावधिरित्येकगुंजामितहेमव
द्धिः॥ इत्येकुरुणादिवसे स्थिचंद्रे॥ १३॥ सूर्योपरागे दत्तानि रत्नानि॥ वृद्धिस्त्रयो
द्धिः॥ इत्येकुरुणा दिवसे॥ रसाग्नियुग्मेषु रवनंदचाष्टनागद्विवह्निप्रमितामणाः॥
निक्षिपतां ध्रुवं स्यात्॥ रसाग्नियुग्मे तु रवेर्नंदचाष्टे मामेव मं हेडे दशारत्निकामिरिति॥ अथ नक्षत्रेग्र रामः
स्तु॥ वस्येंदुरो रेदृष्टो तो तत्के मावमं हेडे दशारत्निकामिरिति॥ प्रतिग्राही कुरुक्षेत्रे मनुयः पुरुषो २९
के प्रायश्चित्तमुच्यते॥ तथाचारुणोस्मृतौ॥ प्रतिग्राही कुरुक्षेत्रे तत्फलं हृदयं कुर्याद्दैवे
मेवेत्॥ तथापि मनसः शुद्ध्यै प्रायश्चित्तं समाचरेत्॥ तत्फलं हृदयं कुर्याद्देवे
न समन्वितः॥ सत्रेणावाय जेतावज पेद्याल लक्षमेकसमकम्॥ जपो गायत्र्या॥ प्रा
धान्यात्॥ तथा॥ वापीकूप॥ तडागादिखनने विसर्जने द्रुतं॥ ब्राह्मणस्य विवा

हादिक्रिया॥ ये सर्वमुत्सृजादिति॥ तत्प्रायश्चित्तं धनो सर्गानंतरं कार्यं॥ यन्महिति
नार्जयंति कर्मणा ब्राह्मणाधनं॥ तस्योत्सर्गेण शुध्यंति दानेन तपसैव चेति मनुः स्मृ
तेरिति दिक्॥ अत्र केचित्सोक्ष्या ग्रहणादर्शने स्नानादिकार्यं॥ नान्यथा॥ स्नानं दानं
तपः श्राद्धमनंतरं राहुदर्शने॥ चंद्रसूर्योपरागे तु यावद्दर्शनगोचर इति जाबालस्मृ
तौ चाक्षुषज्ञानस्यैव प्रयोजकत्वोक्तेरित्याहुः॥ निर्णयस्थलेपि॥ लेनमेघाछादने
धादीनां च स्नानश्राद्धादौ नाधिकार इति॥ तदेतन्नुच्छं॥ यदि चाक्षुषज्ञानं निमित्तं
स्यात्तदा सूर्यग्रहोपरागे रात्रौ दिवा चंद्रग्रहस्तथा॥ तत्र स्नानं न कुर्वीत दद्याद्दानं
च न कुचिदिति वाक्यव्यर्थं स्यात्॥ चाक्षुषज्ञानाभावेन प्राप्त्यभावात्॥ प्राप्तिपूर्वक
त्वान्निषेधस्य॥ किंच॥ नेक्षेतोद्यंतमादित्यं नास्तं यंतं कदाचन॥ नोपरक्तं न वारिस्थं
न मध्यं नभसो गतमिति मनुवचनं बाध्येत॥ अंधस्य पर्वकाले वेध इव यावद्दर्शना
भोजनविधेः त्ति॥ किंच जन्ममध्ये धीमतस्य यावच्चक्षुःप्राप्तेरुपवासप्रसंगश्च॥

वि०पा० राहुदर्शनिरस्येतन्निमित्तमात्रं॥ संक्रांतौ स्नायादितिवत्॥ स्मादर्शनवाक्यानां ग्र स्ना०
३० स्तोस्तविषयत्वात् ज्ञानस्यचार्थतः॥ प्रावेग्रहणाज्ञानमात्रनिमित्तं॥ तेनमेघाच्छा ३
दने॥ धार्दृश्रस्नानादिमवश्यमेवेतिसर्वमनवद्यं॥ इतिग्रहणनिर्णयः॥ अथप्रसं
गात्समुद्रस्नानविधानं॥ आश्वलायनः॥ समुद्रपर्वसुस्नायादमायांचविशेषतः॥
पापैर्विमुच्यतेसर्वैरमायांस्नानमाचरेत्॥ भारतेपि॥ अश्वत्थसागरौ सेव्यौ नस्प्र
ष्टव्यौ कदाचन॥ अश्वत्थमंदवारे तु सागरं पर्वणि स्पृशेत्॥ नकालनियमः सेतौ स
मुद्रस्नानकर्मणीति॥ विधिस्तुपिप्पलादस्मृत्युक्ते ज्ञेयो लोकभयंकरे॥ पाषाणं राम:
तमयादत्तमाहारार्थं प्रकल्पितामितिमंत्रेणाब्धौ पाषाणं प्रक्षिप्य॥ विश्वाचीघृ ३०
ताचीचविश्वयोनेविशांपते॥ सान्निध्यंकुरुमेदेवि सागरे लवणांभसि॥ इति
प्रार्थ्य॥ नमस्तेविश्वगुप्तायनमोविष्णो अपांपते॥ नमोजलधिरूपायनदीनां
पतयेनमः॥ अग्निश्चयोनिरनिलश्चदेहोरेतोधाविष्णुरमृतस्यनाभिः॥ एतद्ब्रु

वन्पांडवसत्यवाक्यं ततोवगाहेतपतिंनदीनामितिभारतोक्तमंत्रान्पठित्वाविधिवत्स्ना
त्वासमुद्रायार्घ्यंदद्यात्॥ तत्रमंत्रः॥ सर्वरत्नोमयः श्रीमान्सर्वरत्नाकरोयतः॥ सर्वरत्न
प्रधानस्त्वंगृहाणार्घ्यंमहोदधे॥ रत्नाकरायार्घ्यंदत्वातर्पयेत्॥ तत्रमंत्राः॥ स्कांदे॥ पिप्पलादंचक
ण्वंचकृतांतंजीवकेश्वरे॥ वसिष्ठंवामदेवंचपराशरमुमापतिं॥ वाल्मीकिंनारदंचै
वंवालिखिल्यांस्तथैवच॥ नलंनीलंगवाक्षंचगवयंगंधमादनं॥ जांबवंतंहनूमंतं
सुग्रीवंचांगदंतथा॥ मैंदंचद्विविदंचैववृषभंशरभंतथा॥ रामंचलक्ष्मणंचैवसीतांचै
वयशस्विनीं॥ एतांस्तुतर्पयेद्विद्वान्छिद्रमध्येविशेषतः॥ आब्रह्मस्तंबपर्यंतंयत्किंचि
त्सचराचरं॥ मयादत्तेनतोयेनतृप्तिमेवाभिगच्छत्विति॥ समुद्रस्नानविधानं॥ इ
तिश्रीमत्परमवैदिकश्रीमन्नागदेवभट्टसूनुनाऽनंतभट्टेनविरचितेविधानपा
रिजातेतिथिनिर्णयः समाप्तः॥ श्रीकृष्णार्पणमस्तु॥ श्रीरस्तु॥ यस्यहस्तेगदाच
क्रंगरुडोयस्यवाहनं॥ लक्ष्मीर्यस्यांकसंस्थानास्मेविष्णुःप्रसीदतु॥ ॥ अथमा

वि॰पा॰ सविधानान्युच्यंते॥ तत्र चैत्रशुक्लप्रतिपदि संवत्सरारंभ उक्तः॥ सा चोदयव्यापिनी ग्राह्या॥ स्त॰
३१ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सतीति हेमा ३
माद्रौ ब्रह्मपुराणात्॥ दिनद्वये॥ ह्यो सौ चेत्॥ अव्याप्तौ वा पूर्वैव॥ चैत्रसितप्रतिपदि यो
वासरोऽर्कोदये स वर्षेशः॥ उदयद्वितये पूर्वो नोदययुगलेऽपि पूर्वः स्यात्॥ इति ज्योति
र्निबंधोक्तेः॥ यदा तु चैत्रो मलमासो भवति तदा तत्र दैवकार्यस्य निषिद्धत्वाच्छुद्धमासि
संवत्सरारंभ इति केचित्॥ निर्णयस्तु॥ शुक्लादिर्मलमासस्य प्रांते भवति चोत्तर इति व
चनादन्निमवर्षांतःपातित्वेन मलमासमारभ्यैव वर्षारंभः शुक्लात्कालादपि वक्तव्य इ रामः
ति वयं साधु प्रतीमः॥ अत्र तैलाभ्यंगो नित्यः॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च॥ ३१
तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इति वृद्धवसिष्ठोक्तेः॥ भविष्ये॥ चैचैत्रे मासि
महाबाहो पुण्या प्रतिपदा परा॥ तस्यां वै निंबपत्राणि प्राश्य संस्कृत्य यांति थिं॥ राक
वत्सरमध्ये मंत्रिणां स्थापनं च परमेश्वपालिनं॥ अथ गणाः पठनाद्ये वैनराणां शुभतां यायास्यश्च
२

मं सह श्रियेति॥ अस्यां प्रतिपदि नवरात्रारंभ उक्तो मार्कंडेयपुराणे॥ शरत्काले महापूजा क्रिय
ते या च वार्षिकी॥ वसंतकाले सा प्रोक्ता कार्या सर्वैः शुभार्थिभिरिति॥ तिथिरत्ने परविद्धाग्रा
ह्या॥ अमायुक्ता न कर्तव्या प्रतिपच्चंडिकार्चने॥ मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्वि
तेति देवीपुराणात्॥ अन्योत्र विशेषः॥ शारदनवरात्रे वक्ष्यते॥ अत्र प्रपादानमुक्तमपरार्के भ
विष्यपुराणे॥ अतीते फाल्गुने मासि प्राप्ते चैत्रे महोत्सवे॥ पुण्येऽह्नि विप्रकथिते प्रपादानं
समारभेत्॥ ततश्चोत्सर्जयेद्विद्वान्मंत्रेणानेन मानवः॥ मंत्रस्तु॥ प्रपेयं सर्वसामान्या भूतेभ्यः
प्रतिपादिता॥ अस्याः प्रदानात्पितरस्तृप्यंतु हि पितामहा इति॥ अनिवार्यं ततो देयं जलं मा
सचतुष्टयं॥ प्रपादातुमशक्तेन विशेषाद्धर्ममीप्सुना॥ प्रत्यहं धर्मघटको वस्त्रसंवेष्टि
ताननः॥ ब्राह्मणस्य गृहे देयः शीतामलजलैः शुचिः॥ तत्र मंत्रः॥ एष धर्मघटो दत्तो ब्रह्म
विष्णुशिवात्मकः॥ अस्य प्रदानात्सकला मम संतु मनोरथाः॥ अनेन विधिना यस्तु धर्मकुं
भं प्रयच्छति॥ प्रपादानफलं सोपि प्राप्नोतीह न संशय इति॥ प्रपादानेतिकर्तव्यतावि
ने॰

नि०प० ३२ ॥ राघश्चतुर्थस्तबके द्रष्टव्यः॥ चैत्रशुक्लतृतीयायां गौरीमीश्वरयुतां संपूज्य दोलोत्सवं कु स० ३
र्यात्॥ तृतीयायां यजेद्देवीं शंकरेण समन्वितां॥ कुंकुमागरुकर्पूरमणिवस्त्रसुगंध
कैः॥ स्रग्गंधधूपदीपैश्च दमनेन विशेषतः॥ आंदोलयेत्ततो वत्स यावन्नाधवमासकं॥ र
तिनितायामनेन देवीपुराणोक्तेः॥ इयं तिथिः परविद्धा ग्राह्या॥ मुहूर्त्तमात्रसत्वेदिने गौ
रीव्रतं परत इति माधवोक्तेः॥ चैत्रशुक्लतृतीयायां मत्स्यजयंती ज्ञेया॥ चैत्रशुक्लतृती
यायां भगवान्मीनरूपधृगिति मात्स्योक्तेः॥ अत्रैव प्रसंगाद्दशावतारजयंत्यो निर्णीयं
ते॥ पुराणसमुच्चये॥ मत्स्योभूद्भूतशुद्दिने मधुसिते॥ कूर्मो विधौ माधवे वाराहो गिरिजा राम० ३२
सुतेनभसि॥ यद्भूते सिते माधवे॥ सिंहो भाद्रपदे सिते हरिदिवसे श्रीवामनो माधवे रा
मो गौरितपाव ततः परमनेः पुष्पाप्यस्यां क्रमेण॥ कालो विज्ञेयोपि तत्रैव॥ अन्हो मध्यव
मनोरामरामो मत्स्यः क्रोडश्चापराह्णे विभागे॥ कूर्मः सिंहो बौद्धकल्की च सायंद्दे हमो
रात्रौ कालसाम्ये च पूर्वैति॥ कुलमुद्दिनं तृतीया॥ मधुसिते चैत्रस्य शुक्लपक्षेपि योदि

तीयायां॥ गिरिजासुतश्चतुर्थी भूतं चतुर्दशी॥ रिद्दिनं द्वादशी॥ गौरि तिथिस्तृतीया॥ यच्च॥
आषाढशुक्लपक्षे तु एकादश्यां महातिथौ॥ यजंती मत्स्यनाम्नीति तस्यां कार्यं प्रबोध
णमिति वाराहवचनं॥ विरुद्धं भासते तत्कल्पभेदेन व्यवस्थापनीयं॥ एता जयंत्यस्तु पा
सकानां नित्याः अन्येषां तु काम्या इति हेमाद्रिः॥ अथ कल्पादिरभिधीयते॥ हेमाद्रौ मात्स्ये
ब्राह्मणो यदिनस्यादि कल्पादिः सा प्रकीर्त्तिता॥ वैशाखस्य तृतीया या॥ कृष्णा या फाल्गु
नस्य च॥ पंचमी चैत्रमासस्य तस्यैवांत्या तथापरा॥ शुक्ला त्रयोदशी माघे कार्त्तिकस्य
तु सप्तमी नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहं॥ कल्पानामादयो ह्येता दत्तस्याक्ष
क्षयकारका इति॥ अत्र सर्वो निर्णयो मन्वादिवज्ज्ञेयः॥ चैत्रशुक्ले नवमी श्रीरा
मनवमी॥ सा च मध्याह्नयोगिनी ग्राह्या॥ चैत्रशुद्धे च नवमी पुनर्वसुयुता यदि॥ सै
व मध्याह्नयोगेन महापुण्यतमा भवेदिति स्कांदोक्तेः॥ दिनद्वये मध्याह्नव्याप्तौ तदभा
वे वा निर्णयमाह माधवाचार्यः॥ नवमी चाष्टमीविद्धा साज्या विष्णुपरायणैः॥ उपोषणं

वि०पा० नवम्यां च दशम्यां चैव पारणमिति॥ नक्षत्रयोगे तु॥ पुनर्वस्वृक्षसंयोगः स्वल्पोपि यदि स्त०
३३ दृश्यते॥ चैत्रशुक्लनवम्यां तु सा तिथिः सर्वकामदेति स्मरणान्मध्याह्नयोगाभावेपि ३
युक्तैवोपोष्या॥ योगस्यातिप्राशस्त्यात् पारणं तूभयंतेस्यादेकस्यां तु वेति इदं च व्रतं
संयोगपृथक्त्वन्यायेन काम्यं नित्यं च॥ उपोषणं जागरणं पितॄनुद्दिश्य तर्पणं॥ त
स्मिन्दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः॥ यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः॥
कुंभीपाकेषु घोरेषु पच्यते नात्र संशय इति हेमाद्र्युक्तेः॥ केचिदिदमुपासकानामेव
नित्यं न त्वन्येषामित्याहुः॥ प्रत्यवायश्रवणस्य व्रतमात्रस्वत्वात्सर्वव्रतस्य नित्यत्वप्रसं
गादित्यनिष्टमपि वदंति॥ जन्माष्टमी तु वीप्साप्रत्यवायादिश्रवणान्नित्यैवेति सर्वं रामः
समंजसं॥ व्रतकारस्तु अगस्त्यसंहितायां द्रष्टव्यः॥ प्रयोगस्तु॥ यथाशक्ति सुवर्णे ३३
न सीतासमेतरघुनाथप्रतिमां भरतशत्रुघ्नलक्ष्मणप्रतिमाश्च निर्माय पंचामृत
न संपूज्य दंडवत्प्रणिपत्य अशोककुसुमैर्युक्तमर्घ्यं दद्यात्॥ तत्र मंत्रः॥ दशाननवधा

र्थाय धर्मसंस्थापनाय च॥ राक्षसानां विनाशाय दैत्यानां निधनाय च॥ परित्राणाय
साधूनां जातो रामः स्वयं हरे॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघेति॥ ततो रा
त्रौ जागरणं कृत्वा प्रातः कृत्यं विधाय साज्येन पायसेन मूलमंत्रेण शतमष्टोत्तरं हुत्वा
प्रतिमां चाचार्याय निवेद्य ब्राह्मणैः सह भुंजीतेति॥ ननु रामनवम्यादेर्नित्यपक्षे मलमा
सेपि कर्त्तव्यता स्याद्धरिवासरवदिति चेन्न॥ एकादश्यां न भुंजीत पक्षयोरुभयो
रपीत्यादिनिषेधस्य मलमासेपि पालनीयत्वादिह तथात्वाभावादुत्तरे देवकार्या
णि पितृकार्याणि चोभयोरिति स्मृतेः शुद्धमास एव जयंत्युपवास इति सिद्धं॥
एवं जन्माष्टम्यादेर्ज्ञेयं॥ इति रामनवमीव्रतविधानं॥ चैत्रशुक्लैकादश्यां हरेर्दो
लोत्सव उक्तो ब्राह्मे॥ चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः॥ आंदोल[illegible]
नीयो देवेशः सलक्ष्मीको महोत्सवैरित्यादि॥ चैत्रशुक्लद्वादश्यां हरेर्दमनोत्सव
उक्तो रामार्चनचंद्रिकायां॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः॥ बोधा

वि० पा० यत्नादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति॥ अकरणे प्रत्यवायः पाद्मे॥ कृत्ते त्रिलंम स्मृ०
३४ धौ दोत्तां श्रावणे तंतुपूजनं॥ चैत्रे च दमनारोपमकुर्वाणो व्रजत्यध इति॥ शिवस्य र
तु॥ शिवा — च चतुर्दश्यामर्पयेद्दमनं बुध इति विशेषः॥ अत्र च द्वादशी मंत्तंत्रीअं
गीकृत्यैस्य पारणादिनं ग्राह्यमित्युक्तं तच्चैव॥ पारणाहो न लभ्येत द्वादशी घटिका
पि चेत्॥ तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे इति॥ गौणकालोपि॥ हरेर्न द
मनारोपः स्यान्मधौ विघ्नतो यदि॥ वैशाखे श्रावणे वापि तत्तिथौ स्यात्तदर्पणमि
ति॥ अन्यच्च॥ उपाकर्मोत्सर्जनं च पवित्रदमकैनार्पणं॥ ईशानस्य बलिर्विष्णोः शय रामः
यन परिवर्त्तनं॥ कुर्याच्छुक्रस्य च गुरोर्मौढ्येपीति विनिश्चय इति ज्योतिर्निबंधे॥ ३४
शुक्रास्तादावपि कार्यमित्युक्तं॥ मलमासेन भवत्येवा॥ उपाकर्मोत्सर्जनं च पवित्र
दमनार्पणमिति वर्ज्येषु परिगणनात्॥ उपाकर्मोत्स तत्प्रयोगस्तु॥ स्वयमाशै
रामाद्दमननकमानीय देवाग्रे न्यस्य तेन वस्त्रोपर्यधिवास्य तस्मिन्कामदेवरती

मवाहयदूजयित्वा ह्रीं क्लीं कामदेवाय नमः॥ ह्रीं रत्यै नम इति यथाशक्त्यभिमंत्र्य तत्तंम
लमंत्रेण विल्वादिभ्यः समर्पयेदिति॥ इत्यनंतभट्टविरचिते विधानपारिजाते चैत्र
मासकर्त्तव्यानि॥ अथ वैशाखविधानानि॥ पृथ्वीचंद्रोदये विष्णुः॥ तुलामकरमे
षेषु प्रातःस्नानं विधीयते॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति सौरमास
उक्तं॥ अन्यपक्षद्वयमपि तत्रैव॥ मधुमासस्य शुक्लायामेकादश्यामुपोषितः॥ पं
चदश्यां च मेषसंक्रमणे तु वा॥ विशाखवर्क्षे॥ लग्ने त्रः॥ वैशाखसकलमा
सं मेषसंक्रमणे वा॥ प्रातःस्नानियमस्नानस्य गीयतां मधुसूदनः॥ मधुहंतुः प्रसादेन
ब्राह्मणानामनुग्रहात्॥ निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहं॥ माधवे मेषगे भा
नौ मुरारे मधुसूदन॥ प्रातःस्नानेन मे नाथ फलदो भव पापहन्निति॥ यत्तीर्थस्ना
तितन्मामग्राह्यं तदज्ञाने विशेषो गारुडे॥ यदाज्ञायते नाम तस्य तीर्थस्य भोद्दे
ज्ञाः॥ तत्रैत्युच्चारणं कार्यं विष्णुतीर्थमिदं स्मृतं॥ तीर्थस्य देवता विष्णुः सर्वत्राम

पिनसंज्ञाय इति॥ अन्यच्च॥ तुलसीदलक्ष्मगोराख्यातयाभ्यर्च्य मधुद्विषं॥ विशेषेण स्क०
वि०पा० तु वैशाखे नरो नारायणो भवेत्॥ माधवं सकलं मासं तुलस्या योर्चयेन्नरः॥ त्रि २
३५ संध्यं मधुहंतारं नास्ति तस्य पुनर्भवः॥ कंठूयदृष्टतो गांतु स्नात्वा चापि पयस्यसिंचनं॥
दलला गोविंदमभ्यर्च्य न दुर्गतिमवाप्नुयात्॥ तथा॥ एकभक्तमथो नक्तमयाचित
मतंद्रितः॥ माधवे मासि यः कुर्यादृतुभते सर्वमिप्सितं॥ वैशाखे विधिना स्नानं दे
वनद्यादिके बहिः॥ हविष्यं ब्रह्मचर्यं च भूशय्या नियमास्थितिः॥ व्रतदानं दमो दे
विमधुसूदनपूजनं॥ अपि जन्मसहस्रोत्थं पापं दहति दारुणं॥ एवं संपूर्णस्नाना रामः
शक्तौ त्र्यहं वा स्नायात्॥ तदुक्तं पाद्मे॥ त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिन ३५
त्रयं॥ अपि स्नानविधानेन नारी वा पुरुषोपि वा॥ प्रातःस्नानः सनियमः सर्वपा
पैः प्रमुच्यते इति यदि मलमासो वैशाखस्तदा मासद्वयेपि स्नातव्यं॥ नित्यत्वा
दिति॥ अन्यो विशेष उक्तो परार्के वामनपुराणे॥ गंधपुष्पमाल्यानि तथा वैशाखेसु

रभीणि च॥ फलानि पानकादीनि मधूनि सुरभीणि च॥ देयानि द्विजमुख्येभ्यो मधुसू
दनतुष्टये॥ प्रत्यहं दिनमेकं वा शक्त्यभावेन चमानवैरिति॥ एवं स्नानांते उद्यापनं का
र्यं॥ तच्च पाद्मे द्रष्टव्यं॥ यथोक्तकरणाशक्तौ तु तत्रैवोक्तं॥ वैशाख्यां विधिना स्नात्वा
भोजयेद्ब्राह्मणान्दश॥ पंचत्रीन्वाप्यपापेभ्यो मुच्यते नात्र संशय इति॥ वैशाखशु
क्लतृतीयाक्षय्यतृतीयोच्यते॥ सा च पूर्वाह्णव्यापिनी ग्राह्या दिनद्वये तद्व्याप्तौ
परैव॥ तदुक्तं निर्णयामृते नारदीये॥ वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयु
ता दुर्लभा बुधवारेण सोमेनापि युता तथा॥ पूर्वविद्धा न कर्तव्या परविद्धा प्रशस्य
ते इति॥ इयं युगादिरपि॥ सा चोक्ता रत्नमालायां॥ माघे पंचदशी कृष्णा नभस्ये च
त्रयोदशी॥ तृतीया माधवे शुक्ला नवम्यूर्जे युगादय इति॥ अत्र श्राद्धमुक्तं मात्स्ये॥
कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु॥ हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भ
वेदिति॥ श्राद्धेपि परविद्धैव॥ पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः॥ दैवे क

वि०पा० मैत्रायणि पित्र्ये च कृष्णः श्रेष्ठो वापराह्णिका इति पाद्मोक्तेः॥ द्वे शुक्ले द्वे तथा कृष्णे युगादी कव- स्म०
३६ विदुः॥ शुक्ले पूर्वाह्णिके ग्राह्या कृष्णे चैवापराह्णिके इति हेमाद्रौ नारदीयोक्तेश्च॥ स्मृ- २
त्यर्थसारेपि॥ युगादिमन्वादिश्राद्धं शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या॥ कृष्ण-
पक्षेऽपराह्णव्यापिनी ग्राह्येति॥ दिवोदासीये गोभिलः॥ वैशाखस्य तृतीयायां पू-
र्वविद्धां करोति हि॥ हव्यं देवा न गृह्णंति कव्यं च पितरस्तथेति॥ दिनद्वये तद्व्याप्तौ
परैवेति हेमाद्र्यादयः॥ यत्तु कालादर्शे॥ अमाश्राद्धमापराह्णिकमित्युक्त्वा एव-
मन्वंतरादीनां युगादीनां विनिर्णय इत्युक्त्वा द्वे शुक्ले इत्यादिवचनं विष्णुपूजनविष- राम:
यमित्युक्तं॥ तत्तु पूर्वोक्तानेकवचनविरोधाद्गोभिलेन कव्यं च पितरस्तथेत्यस्य ३६
निषेधादुपेक्ष्यं तृतीयायां॥ अत्र दानविशेषो भविष्ये॥ उदकुंभान्सकनकान्सान्नान्सर्वर-
सैः सह। यवगोधूमचणकान्सक्तुदध्योदनं तथा॥ ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्र-
शस्यते इति॥ उदकुंभमंत्रस्तु॥ एष धर्मघटो दत्तो ब्रह्माविष्णुशिवात्मकः॥ अस्य प्रदा-

श्री॥

नात्सफलं तु पितरोपि पितामहाः॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं॥ पितृभ्यः संप्रदास्यामि अक्ष-
य्यमुपतिष्ठत्विति॥ अत्र च पिंडरहितं श्राद्धं कुर्यात्॥ अयनद्वितये श्राद्धं विषुवद्वितये तथा॥ युगा-
दिषु च सर्वासु पिंडनिर्वपणं विना इति हेमाद्रौ पुलस्त्योक्तेः॥ अत्र रात्रिभोजने धनायश्रीत्तमग्नीधाने॥ ५
रात्रौ तु लेखस्सूरे तु मन्वादिषु युगादिषु। अतिस्वल्पे मंत्रे च जपे दश शतं पावकमिति॥ अत्र मलमा-
सेसति मासद्वयेपीदं कार्यं॥ योगादिकं मासिकं च श्राद्धं चापरह्णिकं॥ मन्वादिकं तैथिकं च कुर्यान्मा-
सद्वयेपि चेति स्मृतिचंद्रिकोक्तेः॥ अपरपक्षः हस्तपक्षः॥ न तु महालयः॥ तत्र तस्य निषेधादिति श्रीग
तत्रोक्तेः॥ अत्र अभ्यकारणेश्चायमग्निधाने॥ नरस्य घावा मंत्रं च शततारं तदा जपेत्॥
युगाख्यो यत्र नरः कुरुते नैव यापिपदिति॥ इयमेव तृतीया परशुराम जयंती। सा च प्रदोषव्या-
पिनी ग्राह्या॥ वैशाखस्य सीते पक्षे तृतीयायां पुनर्वसौ॥ निशायाः प्रथमे यामे जातो रामः कु-
मारः स्वदिति रामार्चनचंद्रिकोक्तेः॥ दिनद्वये तद्व्याप्तौ अंशतो व्याप्तौ अव्याप्तौ च परैव॥ शुक्लात्तृ-
तीया वैशाखे शुद्धोपोष्या दिनद्वये॥ निशायां पूर्वयामे चेदुत्तरा-ऽन्यत्र पूर्विकेति। तथा। वैशा

विधान० स्वभुक्ते सप्तम्यां गंगोत्पत्तिरुक्ता ब्राह्मे वैशाखस्य शुक्लसप्तम्यां जह्नुना जाह्नवी पुरा ॥ क्रोधात्पीता पुनस्त्य
क्ता कर्णरंध्रात्तु दक्षिणात् ॥ तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति ॥ इयं च मध्याह्नव्यापि
३९ नी ग्राह्या तदुक्तं हेमाद्रौ नृसिंहपुराणे ॥ वैशाखस्य तु पक्षे तु चतुर्दश्यां निशामुखे ॥ मज्जन्म
संभवं पुण्यं व्रतं पापप्रणाशनं ॥ वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारकमिति ॥ स्कांदे च ॥
वैशाखस्य चतुर्दश्यां सोमवारे निजार्हके ॥ अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ॥ इति
दिनद्वये तद्व्याप्तौ अंशतो व्याप्तौ च परा ग्राह्या ॥ विषमव्याप्तौ त्वधिकव्याप्तिमती ग्राह्या ॥
दिनद्वये पि तदव्याप्तौ पूर्वेति निर्णीतत्वात् ॥ इयमेव योगविशेषे ऽतिप्रशस्ता ॥ तदुक्तं नृसिं
हपुराणे ॥ स्वातिनक्षत्रयोगे च शनिवारे तु मद्व्रतं ॥ सिद्धियोगस्य संयोगे वणिजे करणे त ३९
था ॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ॥ तथा ॥ एभिर्योगैर्विनापि स्यान्मद्दिनं पाप
नाशनं ॥ सर्वेषामेव वर्णानामधिकारोस्ति तद्व्रते ॥ मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैरिति
तथा विज्ञाय मद्दिनं यस्तु लंघयेत्स पापकृन्नरः ॥ स याति नरकं घोरं यावच्चंद्रदिवाकरौ ॥ इति

इदमपि निशीथकाम्यं च ॥ प्रयोगस्तु ॥ नृसिंहपुराणे ॥ ... मध्याह्ने तिलामलकैः ॥ स्नात्वा ॥ न
सिंह देवदेवेश तव जन्मदिने शुभे ॥ उपवासं करिष्यामि सर्वभोगविवर्जितः ॥ इति मंत्रेण संक
ल्पं कृत्वाचार्यं कृत्वा सायंकाले श्रीलक्ष्मीनृसिंहस्य यथाशक्ति सुवर्णनिर्मितां प्रतिमां कल
शोपरि प्रतिष्ठाप्योपचारैः पूजयित्वा जागरणं कृत्वा प्रातः स्नानादि विधाय पुनर्देवं
पूज्य ॥ नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते ॥ अनेनार्चाप्रदानेन सफलाः स्युर्मनोरथाः
इत्याचार्याय प्रतिमां दत्वा ब्राह्मणान्भोजयित्वा स्वयं पारणां कुर्वीतेति संक्षेपः ॥ वैशाखपौ
र्णमास्यां विशेषो ऽपरार्के जाबालिः ॥ अन्नोदकुंभं च वैशाख्यां च विशेषतः ॥ निर्दिश्य
धर्मराजाय गोदानफलमाप्नुयात् ॥ सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पंच वा ॥ तर्पयेदुदपा
त्रैस्तु ब्रह्महत्यां व्यपोहति ॥ मंत्रस्तु ॥ एष धर्मघट इत्यत्र तत्तापप्रकरणे निर्दिष्टः ॥ विष्णुरपि
तिलान्कृष्णाजिने दत्वा हिरण्यं मधुसर्पिषी ॥ ददाति यस्तु विप्राय सर्वं तरति दुष्कृतमिति ॥
इति श्रीमन्नारायणात्मजानंतभट्टविरचिते विधानपारिजाते वैशाखविधानानि ॥ अ

थ ज्येष्ठविधानानि ॥ तत्र गारुडे हरेर्जलक्रीडोक्ता ॥ घनागमे प्रकुर्वीत जलस्थं वै जनार्दनं ॥ ये
जना न पश्यंति जनार्दनं तेषां तिष्ठन्नर्वं ॥ स्वर्णपात्रे पयोरौप्ये ताम्रे वा मृन्मयेपि वा ॥ तोयस्थं यो
३९ चयेद्विष्णुं शालिग्रामशिलोद्भवं ॥ प्रतिमां वा महाभाग तस्य पुण्यमनंतकं ॥ तत्र शुक्लतृतीया
यां रंभाव्रतमुक्तं माधवीये भविष्ये ॥ नरेकुरुष्व यत्नेन रंभाख्यं व्रतमुत्तमं ॥ ज्येष्ठशुक्लतृ
तीयायां स्नाता नियमतत्परेत्यादि ॥ सा च पूर्वा निर्दिष्टोक्ता प्राक् ॥ ज्येष्ठशुक्लदशमी दशहरा ॥ त
दुक्तं हेमाद्रौ ब्राह्मे ॥ ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ॥ हरते दश पापानि तस्माद्दशह
रा स्मृतेति ॥ वाराहेपि ॥ दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजे हनि ॥ अवतीर्णा यतः स्वर्गाद्धस्त
र्क्षे च सरिद्वरा ॥ हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥ अत्रान्यो विशेषः काशीखंडे उक्तः
विस्तरभीत्या न लिखितः ॥ यदि ज्येष्ठे मलमासो भवति तत्रैव दशहरा कार्या ॥ न तु शुद्धे ॥ ३९
दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ॥ इति ऋष्यशृंगोक्तेः ॥ गंगाया असंभवे त्वन्यतीर्था
न्तरेपीदं कार्यं ॥ यां काचित्सरितं प्राप्य स्नात्वा दद्यात्तिलोदकं ॥ मुच्यते दशभिः पापैः समाहा

पातकोपमैरिति स्कांदोक्तेः ॥ अस्यां तिथौ सेतुबंधरामेश्वरनमस्कारादि विशेषपूजा कार्या उक्तं
स्कांदे सेतुमाहात्म्ये ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ॥ गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ
दशयोगे सेतुमध्ये लिंगरूपधरं हरं ॥ रामो वै स्थापयामास शिवलिंगमनुत्तमं ॥ तस्मिन्दिने तमी
शानं नत्वा स्यान्मोक्षभाजनमिति ॥ ज्येष्ठशुक्लैकादशी निर्जलमुपोष्योदकुंभं दत्वा मुच्यत इति
निर्णयामृते उक्तं ॥ ज्येष्ठपौर्णमास्यां सावित्रीव्रतमुक्तं भविष्ये ॥ ज्येष्ठे मासि सिते पक्षे पौर्णमा
स्यां तथा व्रतं ॥ चीर्णं पुरा महाभक्त्या कथितं ते मयानघेत्यादि ॥ एतच्च व्रतं ज्येष्ठामावास्यायाम
प्युक्तं निर्णयामृते भविष्ये ॥ अमायां च तथा ज्येष्ठे वटमूले महासती ॥ त्रिरात्रोपोषिता नारी वि
धिनानेन पूजयेत् ॥ इत्यादि इदं च व्रतं दाक्षिणात्याः पूर्णिमायामाचरंति पाश्चात्यास्त्वमायामा
चरंति ॥ अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये ॥ द्वहस्तयान धारं ॥ सा सावित्री वटपैतृकी ॥ ल
क्ष्मीस्फुमीचं भक्ता चक्रवर्त्यास्तु मुख्या तिथिरिति स्कांदोक्तेः ॥ अतविद्धाशिनी बालीनतु तत्र व्रतं च
रेत् ॥ वर्जयित्वा तु सावित्रीं च तत्तु शिरिवयोदनेति ॥ यदा त्वल्पा दश घटिका परदिने तदा पराग्रा

वि०

३८ ख्या॥ पूर्वविद्धे वसा विज्ञीत्रतेदंच दशी तिथिः॥ कात्योऽस्य दशमत तस्य सुमुखे मत्र परेद्युनीति॥ माधवाचा
र्यो क्तेः॥ अत्राहित्य पुराणे विशेष उक्तः॥ ज्येष्ठे मासि सिता न दशा त्यो एतां ज्ञास्या विशेषतः॥ अश्व
मेधस्य यत्पुण्यं तत्प्राप्नोति न संशय इति॥ दशमन्वादिरपि॥ सावर्णे र्वाल्लिकी ख्याते त्युक्तं॥ इति
विधान पारिजाते ज्येष्ठमासविधानानि॥ अथाषाढमास विधानानि॥ आषाढस्य सिते द्वादश्यां पौर्ण
मास्यां च मन्वादिः॥ सापूर्वाल्लव्यापिनी ग्राह्योक्तं॥ आषाढस्य सिते कार्यं दशम्यां दशपापहातन
तत्क्रहि धारणं पुरश्चरणचार्यं न चेदिकार्यो नलिङ्गपरिचर्यां च॥ न विद्ये॥ शयन्यां चैकादशी॥ धि
स्यांचक्र तीर्थ पैतस्य च च॥ २॥ शंखचक्रविधानेन वाकिप्रहोन्न वेक्षर इति॥ ऋग्वेदे सतमाष्ट
केत तायेध्याये॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः॥ अतप्त तनूर्न तद ३८
मो अश्नुते शृतास इद्वहन्तस्तत्समाशत॥ तथा॥ तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अ
स्य तन्तवो व्यस्थिरन्॥ अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधितिष्ठन्ति चेतसा॥ इति॥ तथा
तत्रैवाष्टके चतुर्थाध्याये॥ वसम यश्चेनः शकुनो विभ्रत्वा गो विंदुर्द्रप्स आयुधानि बिभ्रत॥

अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति॥ तथा॥ परो मात्रयेति सूक्त पारिशिष्टे
पि॥ चरन्ति वितति व पुष्पा वाससो दवितेन वाहु नारेतु दर्शने प्रयताः स्वर्गमायन्॥ येषां छित्तामा
नवा लोकस्तेषि वितन्वंति वालेण स्तहृंहोलि इति॥ यजुर्वेदेपि॥ येन देवाः पवित्रेणात्मानं पुन
ते सदा॥ तेन पवित्रेण शुद्धेन पूतमग्ना पुनंतु मां इति॥ तैत्तिरीयारण्यके॥ चरणं पवि
त्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि॥ तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं त
रेमेति॥ काण्वशाखायामपि॥ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्॥ अग्ने क्रत्वा क्रतूँरनु
यतेष वित्रमर्चिष्यग्ने वितत संतरा॥ ब्रह्म तेन पुनातु मेति॥ शतपथेपि॥ स होपाचयान्नवस्य
स्तस्मात्सुमानात्मधीतायद्दिक्रजेसुम्नो कमोजेर्वमाणग्निना संधत्त इति॥ सामवेदेपि
घृतेवि स्रो अस्य चत्रेसुत सेउन्नां जोषितर्त वेवचर्षणीः॥ स्तेवा क्रोदं धन्या पुराणे निवि
स्रो लिंगान्यायुधानि विभ्रदिति॥ पाद्मेपि॥ अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा॥ ब्राह्म
णस्य तथैव ब्रतस्य च आदिधारणमिति तिलुञ्चक्ति चेत्कादयेपि॥ आलेनारदः॥ विष्णुनाम

चि॰ कितां मुद्रां न छादयेत्स्वमन्दिरे तां शंखचक्राद्युधैर्युक्तां स्वर्णरौप्यमयीं तथा ॥ धत्ते नागवतोयम्
सु॰ स्तु कलिकाले विशेषतः प्रज्ञादस्य समो ज्ञेयो यस्य स्यात्कलिवर्द्धन ॥ शंखचक्राङ्कितो नित्यं आई
यं कुरुते द्विजः ॥ विधिहीनं तु संपूर्णं चिह्नाणां तु गया समं यथाग्निः दहते कच्चं वायुना प्रेरितो भृशं ॥ त
पादहंति पापानि हृष्यार्चन सुधान्विते ॥ शंखांकित तनुर्विप्रो भुंक्ते यस्य तु वेश्मनि ॥ तदन्नं स्वयम
श्नाति पितृभिः सह केशवः ॥ सुमुद्रां कितां हस्तो यस्तु भ्रामं न करोति यः ॥ द्वादशाक्षरजितं पदं पद्म
ले यो यगच्छति ॥ सुमुद्रां कितो यस्तु श्मशाने क्षिपते यदि ॥ प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य वै
स्मृता ॥ सुमुद्रधैः कालो निसंमंडितो यस्य विग्रहः ॥ तत्राश्वमेधं कुर्वंति विबुधा वासवादयः ॥
करोति हरेः पूजां सुदर्शनाङ्कितो नरः ॥ अपराधसहस्राणि नित्यं हरति केशवः ॥ सुमुद्राकाष्ट ५०
मयं बिंबं सशस्त्रैस्तु चिह्नितं ॥ तेनांकयति चात्मानं तत्समो नास्ति वैष्णवः ॥ पाखंडपतिते
भ्यो येनास्ति कालमपतत्परे ॥ न जिप्यते हतैः सुसशस्त्रांकितो नरः स्त्रियो दि ॥ द्वारकामाहात्म्ये
पिपायवे ॥ अग्निनेवतु संतप्तं चक्रं माद्यवैष्णवः ॥ धारयेत्सर्ववर्णेषु हरिसालोक्यसिद्ध

ये ॥ कृत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनुं ॥ चिह्नयेन्न वैष्णवो यस्तु स याति परमां गतिं ॥ नव
प्रश्नपांचरात्रे शुक्रमाहेश्वरसंवादेपि ॥ सौवर्णं राजतं कांस्यं ताम्रं कांस्यमयं तु वा ॥ चक्रं कृत्वा तु
मेधावी धारयीत विचक्षणः ॥ नारदीयपांचरात्रेपि ॥ द्वादशारं तु षट्कोणं वलयत्रयसंयुतं ॥ हरेः
सुदर्शनं तप्तं धारयीत विचक्षणः ॥ पाद्मेपि ॥ उपवीतादिवद्धार्यः शंखचक्रगदादिमम् ॥ ब्राह्मणस्य
विशेषेण वैष्णवस्य विशेषतः ॥ उपवीतं शिखाबंधं धृत्वा कर्मण्यमेव च ॥ चक्रं जोध्य नहीनस्य
विप्रस्यापि फलं नहि यः ॥ चक्रांकिता न्यहं तत्र्व कर्म द्विजोत्तमे ॥ तस्मा चक्रांकितस्तिष्ठेत्स
विचिंतयन्निष्फलं तेन यरुच ॥ शंखचक्रांकनं कुर्यात्तन्नोच्चारु भुजयोः ॥ कलत्रपुत्रमित्रेषु
पश्वादिषु विशेषतः ॥ दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनं ॥ सव्ये तु शंखं बिभृयादिति ब्रह्म
विदो विदुः ॥ चक्रादिधारणं पुंसां हरिसंबंधवेदनं ॥ पातिव्रत्यनिमित्तं हि यथा वलयभूषणं ॥ तत्त
तु विधिवत्कृत्वा पंचायुधविधानतः ॥ तत्तन्मंत्रेण मंत्रज्ञः प्रतिष्ठाप्य पृथक्पृथक् ॥ गौतमीय
तंत्रेपि ॥ ललाटे च गदा धार्या मूर्ध्नि चापं शरं तथा ॥ नंदकं चैव हृन्मध्ये शंखचक्रे भुजद्वये ॥ इ

वि० तिनिंदने निषेधश्च ब्राह्मणे॥ ततश्चक्राकितं दृष्ट्वा ये निंदंति नराधमाः॥ अपवर्जो का सुखं तेषां मादि
४१ त्समवर्जो कथं इत्यादि॥ काशीखंडे पि॥ अन्यायिये हरिहरांक धरा धरायां ते दूरतः पुनरहो परि
वर्जनीया॥ इति॥ तत्रैव ब्रह्मवाक्यानि॥ शंखचक्रांकितस्तु तुः शिरसा मंजरीधरः॥ गोपीचंदनलि
प्तांगो दृष्टश्चेत्तद्घं कुतः इति॥ भारते पि॥ नान्य देवं नमस्कुर्यान्नान्य देवं निरीक्षयेत्॥ चक्रांकितः
सद्भातिदैन्यकृतः पांडुनंदन॥ भीष्मपर्वणः पिप्पलवचनं देवान्तरे ति॥ × ॥ हुतेनेव अस्य
सोमस्य आशावरशा शघं यमितोरसा अवंतिरदंती॥ ॐ॥ पवीतारं पावयितारं यजमानं॥ होमद्वा
रापश्चात्तु हुता॥ हियोवृजो कस्य हुणुश्चतं देशं चेत सावुध्या देवगम्ये छावत्या आधि लिरुं ति॥ आ
श्रयंते इति॥ तथा॥ चमस ध्ये न इति एकोन विंशो सोमावाप्ये विनियुक्ताः॥ चमसेत॥ चमतिन ४१
सर्यंत्यत्रेति चमसाः स्तेषु सोदनातिचमसवत्॥ यद्वा॥ चखौ अधिषवणफलकेत योर्वर्तमान
त्वात्तथा॥ श्येनः शंसनीयः शकुनः श्शक्तः सोमस्पर्शकारी विनत्वा एरतेरानो चनि बिल्या हिना
फानिश्यान्नेषु विरुरणशीलः॥ हयहोमे इति चत्वं॥ गोविंदः यजमानानां गवां जनकः॥ विंदुरिति

उपलत्ययो ततत्वे न निपातः॥ द्रप्सो द्रवणशीलः॥ आयुधज्जिस्पर्धकपाजा निविभ्रत्धारयत्॥ अ
पामुदका नाम् मिश्रेरकं समुद्रं अंतरिक्षनामैतत् अंतरिक्षे जो कं सचमनः॥ सेवमानः॥ महिषो
महान् एवं विधः सोमः स तुरीयं चतुर्थं धमम चांद्रमसं स्थानं विवक्ति सेवते॥ सूर्यलोको प
रि चंद्रलोको वियते॥ यम्मः पृथिव्या अधिपतिः स्वमावत्तिस्याहि गिम्भर्यमान ह्राणमधिपतिः
समावत्त्विस्तेते मैत्रेर्ष्टा यते इति॥ तथा॥ चरणं पवित्रमिति विस्नोः अनि ग्गस्य वास्त्र तिः॥ पवि
त्रेणेति यत्तेपवित्रमिति चसो ब्राह्मणपाजे विनियुक्तः॥ सहोवाचे सा हयस्त्त पव्यमा ततया
नोपलभ्यते॥ अतो नो कार्यो प्रमाणं॥ पध्वी चंद्रोदयनी बंधेत सांकधारणनिषेधश्च॥ तथा हि॥
यस्तु संतप्तशंखादि लिंगचिह्नतनुर्नरः॥ स सर्वयातना भोगी चंडालो जन्मकोटिषु॥ द्विजे तु
तप्तशंखादि लिंगांकित तनुर्नरः॥ सम्भाष्य रौरवे याति यावदिंद्राश्चतुर्दशेति॥ वृद्धनारदी
यो क्तेः॥ शंखचक्राद्यंकनं च नस्यगीतादिकं तथा॥ एकजातेरयं धर्मो न जातु स्याद् द्विजन्मनः॥
शंखं चक्रं मृदायस्तु कुर्यात्तु तायसेन वा॥ स शूद्रवद्वहिष्कार्यः सर्वस्मा द्विजकर्मणः॥ यथा

श्मशानगं काष्ठमनर्हं सर्वकर्मसु। तथा च शंकितो विप्रः सर्वकर्मसु गर्हितः इति विरुद्धाभिधाय
नादिवचनात्॥ स्वशरीरेऽपि नादेहेवासं वेदविक्रिकाणि द्विजइति। मनुस्मृतेः॥ लौकनायदेहेद्वेहेद
।धा.२। हेचेत्वान्यकारतः॥ नाधिकुर्वीत दंभ्यंशो भ्रोतस्मात्तेषु कर्मस्विति वैधायन वचनात्॥ श्रोतव्या
सुपत्वान्नै नां श्रोतव्यमिति कृत्यो नास्ति कारन॥ तलचकं धरान्द्र धूसयासा जलम्यविशेदितिस्मृ
तिसंग्रहवचनाच्च। तस्माद्विधानाभावान्निषिद्धत्वाच्च तस्तांकनं क्षम्यं॥ यदि पुराणवचनं नाम्ना
करस्य तयोपलभ्यं तेतहापि शूद्रविषयं॥ एकजातेरयं धर्मो नान्यस्य तु द्विजन्मन इति विष्णु
स्मृत्या तमाव्यवस्थापनात्॥ तस्मान्मत्सुर विषयमेवं वंशाहं। लेऽन्विधीयते। वैदिकैर्धार्मिकाणां त्वा
तत्प्रतिग्रहत्वर्थतः॥ अत्र तन्मूलभिन्नत्वात् तंशांकः सप्रमाणको लिंगादवविधि॥ कश्चोस्य
भिन्नाविष्कृतो यथा। निषेधवचनं तत्र मूर्तिकायसच्छूगं॥ अहीताविधयंय देसेवमन्वयम ४२
यस्थितिः॥ तथाहि॥ वेदोऽखिलोधर्ममूलं स्मृतिशीलेच तद्विदां॥ आचारश्चैव साधूनामा
त्मनस्तुष्टिरेव चेति मनुस्मृत्याधर्मज्ञसमयः प्रमाणं वेदाश्चेत्यादिसूत्राच्च सदाचारस्य

आमाण्यकथनात्॥ वेदविरुद्धिर्वेदुभिस्तस्यधार्यमाणत्वात्॥ नचतेषां भ्रासात च्छारणमिति
वाच्यं॥ काष्ठादिमात्रजीयविरुद्धत्वाभिसंभूपयिकामवेकोषाभ्रांतिकल्पनस्यान्याय्यत्वात्॥ अपि
त्कस्य होलाकाद्याचारस्य यथा सदाचारत्वं किंतु तस्य सर्वदेशानुगतस्य सदाचारत्वं वक्तुमि
ति। किंच मध्येदेशशिष्टत्वेनाभिमतास्त दाक्षिणैर्दिका नां विवाहभोजनादुर्वि गीतत्वदर्शनेमिथो
नस्मात्। ननु यस्मिन्देशे य आचारः पारंपर्यक्रमागतः॥ श्रुतिस्मृत्यविरुद्धश्च सदाचारः स
उच्यते इति स्मृत्या सदाचारस्य निर्वचनात्र तस्यतलांकस्यापाहह नस्मृतिविरुद्धत्वात्कथं स
दाचारत्वमिति चेत्॥ इदमत्र वेदि। यत्र विधिं विना निषेधमात्रं तस्यैवासदाचारत्वं कलिज
न्त्ताणादिवत्॥ यत्र तु द्वयमप्यस्ति। तत्र विकल्पो ग्रहणाग्रहणेहि वत्। फलातिशयत
श्चात्र वकामसेव्य। यदा। श्रुतिद्वैधं तु यत्रस्यात्तत्र धर्मावुभौ स्मृतौ॥ स्मृतिद्वैधे तु विषयः
कल्पनीयः पृथक्पृथगिति वचनान्निषेधस्यमदायसादिनिर्मितत्वात्तांकं। अविषमत्वं अ
दीक्षित। विषयत्वं चेतिस्साधुः पंथाः चक्रविह्नमहाहत्वानथानसायसेन वा॥ तदेकधारणा

न्नत्येन रक्तान्त्रेति प्रयतो स्कंदपुराणे राजतं ताम्रं च कर्कं कांस्यमयं तथा॥ द्विजातिधार्यं येन द्विज सर्वकर्मसु
४३ पावनमिति नारसिंहपांचरात्रोक्तेः॥ तथा॥ चक्रादिकं सहाधार्यं द्विजैर्वै स्वागमे विष्णुभक्तैर्वि
शेषेण द्विजैर्वै धार्यं तस्मात् रेः॥ आहुरित्युत्ते धारयेद्बुधः पतत्येव न संशय इति चेत् उक्तो नारसिंहपांचरा
त्रोक्तेश्च॥ न चात्र तत्तापसेनेति पर्वक्रमेण तत्पत्र द्वैपर्य्या॥ आयसेनेत्येतावते वार्थसि
द्धेरिति वाच्यं॥ तत्पदस्य शुद्धपर्यायत्वेन शुद्धलोहमिति मिलितमपि चक्रेण धार्यमिलित तदर्थपरत्वा
त्॥ तमायसं शुद्धलोहमिति विष्णुकोशोक्तेः॥ युक्तं शंखचक्राद्यंकनं चन्दनेन गोपीतादिकं कृते
षां॥ एकजातेरयं धर्मो न जातु स्याद्द्विजन्मन इति चक्रधारणं वर्जनं द्विजातेस्तत्र। पि वधावत्स्व
र्यत्वेन धार्यमित्येतत्परं॥ वचनागमादिके त्याज्यं रसपर्थं वादनं द्विजै॥ ... नसव यादूर
र्गिकं रहितं जननतो फलदिति॥ स्कंदे मार्गशीर्षमाहात्म्ये॥ चक्रादिकसहाधार्यं द्वी ४३
जातैर्वै स्वागमे विष्णुभक्तैर्विशेषेण द्विजैर्वै धार्यं तस्मात्सदैवेति पर्वोक्तविशेषोक्तेश्च॥ नचैषां
वचनानां निबंधाद्यनुपलंभाद् अप्रमाणकत्वमिति वाच्यं॥ पुरुषदोषो ये न तु अमगदो

षः॥ अन्यथा भारतादिसमस्तपुराणस्य निर्बंधायावत्तु दाहृतत्वात् तस्याप्रमाणप्रसंगात् एवं स्यादिस
त्वं प्रपंचेन॥ यत्तु एकजातेन एकस्मादेव पितुर्जन्म यस्य स एकजाति विशुद्धमातापितृज
न्मस्तस्य वायं धर्मो न द्विजाते द्वाभ्यां पितृभ्यां जातिर्जन्म यस्य स द्विजातिः कुंडगोलकास्तस्य
नायं धर्म इति व्याख्यानं॥ जातिशब्दस्य जन्मार्थत्वं च तत्र द्विजाति सारूप्यमिति मीमांसास
त्र्यां रत्नाने॥ अग्निवैश्वानरे ... विशुद्धाधिकारस्तु विशुद्धस्यै
व नान्यथा॥ यज्ञेषु पाषंडमपकपतितादि विवर्जनादिति कूर्मपुराणोक्तेः॥ धर्माणां तु पवित्र
तइत्याहिम्न॥ युक्तं तेषां कर्मान्तरे निषिद्धत्वे ... भाष्यादौ तत्परत्वात्तु पज
न्विः॥ रिति॥ तदपि न सांप्रतं॥ उक्तादि विहितानुलेन ... सहज ... सूर्येण त्या
दिमंत्रस्यान्यत्र विनियुक्तस्यापि लिंगाद्यन्तरादि विधायकत्वं यथा मीमांसकैरंगीकृतं
तथात्रापीति न कोपि दोषः॥ तदुक्तं ... लके॥ ये ... सहज ... सूर्येण त्यादीनां मंत्राणांत
त्तत्कर्माणि विनियुक्तानामपि। प्रपात्रवर्जनादि विध्यापकत्वं ... तद्धीकरणं गीकृतं

यथावा ॥ तस्मान्नकुर्यात्तु जस्यैव यो मा न्याग्गस्तु पैतृष्वसेयीं वृणीमि वेत्यादीनां श्रवणेन तत्तत्क
४४ र्मणि विनियु क्तानामपि मातुलकन्याविवाहविध्यापकत्वमंगीकृत्य तं माधवाचार्येण पाराशर
स्मृतिटीकायां ॥ यथवा देवांश्च याभिर्यजते ददाति चेति मंत्रस्य पाञ्चाल्येन विनियुक्तस्याभिरिति
यागकरणत्वेनाभिधानाद्धेच सामर्थ्येन कर्मकारकतया च पाकोदकमार्गदानविधायक
त्वमविरुद्धमिति न्यायसुधायामुपपादितं यथावा ॥ चत्वारि शृंगा ॥ चत्वारि वाक्परिमितानि
पदानि ॥ उत त्वः पश्यन्नित्यादिमंत्राणां मन्त्रकर्मसु विनियुक्तानामपि व्याकरणाध्ययनविधिप्र
कत्वं भगवता पतंजलिना महाभाष्ये ॥ अनुपगतं ॥ यथावा ॥ विधिशक्तिर्मन्त्रस्य नियो
गेनाप्यनीयते ॥ स्वतो विधिस्पर्शित्वेन विनियोगात् स्मारकेष्वपीति तंत्रवार्त्तिके भट्टाचार्येण वि ४४
विधायकत्वमंगीकृत्य तत्तु समन्वयादित्यत्र लक्षणेन च सर्वेषां शब्दानां पदब्रह्मभक्तेः ॥
विष्णो समन्वयकथनाच्च शुद्धादेशात् तत्परत्वमभ्यर्हितं ॥ तदयं पवित्रं ततमिति मंत्रार्थः ॥ ब्रह्म
णस्पते वेदस्य चतुर्थस्य स्वामिन् विष्णो ते तव पवित्रं पवित्रयति भयलिमतानीति

पवित्रयति पात्रेसु जनानिति पवित्रं यच्चक्रं विततं तेजोभिर्व्याप्तं विस्तृतं वा वर्त्तते ॥ तेन चक्रेण प्र
त भुः सर्वेषां समस्तं गात्राणि अस्माकं शरीराणि पर्येषि पवित्रयसि किं पं जगत्सादिमा प्रानवत्क ।
तिपर्याणि पवित्रीकरोषि ॥ चेत्याह वि भ्यत इति विभिः तैः स्वर्षु प्रकारेण सर्वाणि पर्यंगानि पवित्री
करोषि ॥ परि सर्वत एनं ताविति धातुः प्राप्त्यर्थे वर्त्तते ॥ पवित्रशब्दस्य विष्णुचक्रवाचकत्वं
तु काण्वशाखायां शतपथे सौत्रामणिप्रकरणे दृष्टं ॥ यत्ते पवित्रमिति तद्यथा विष्णोश्चक्रं तत्पा
पवित्रमसीत्येवैतदाहेति ॥ अभिधाने च पवित्रं चरणं नेमिरथांगं चक्रं सुदर्शनं ॥ सहस्रारं प्रा
हुतं च लोकद्वारं तैजसं ॥ नामानि विष्णुचक्रस्य पर्यायेण निबोधमे इति ॥ तथा ॥ पवित्रं च
रणं चक्रं लोकद्वारं सुदर्शनं ॥ पर्यायवाचकाश्चैते चक्रस्य परमात्मन इति ॥ तथा ॥ सुदर्शने
च दर्भे च पवित्रं शरणं स्तृतं इति ॥ विश्वकोशेपि दृष्टं ॥ एवं प्रवर्द्धित चक्रं स्तृतिसु त्वां इत्यता
दैन चक्रधारणरहितानां निषेधपर्य्यवसानात्तद्विशिष्टानां श्रीविष्णुधर्मो निरुच्यते ॥ अत एतन्न इति ॥
श्री विष्णुचक्रेण अंतसंस्पृष्ट तनुर्य स्सपुमान् आमः अशास्त्रीयत्वं च संस्कारा भावात् ।

परिपक्वाः संतस्तत्र प्रसिद्धे विश्वाख्ये ब्रह्मणे अद्भुतेन धाम्नो लिप्यपयेवर्हंत विष्णुचक्रेण तप्ता धम
४५ रयं तत्र शास्त्रोक्तविधिना तेष्वंतास्ते इत्याप्याक इति धातोर्निष्पन्नस्य रूपमेतत् ॥ तथा च शास्त्रोक्त
संस्कारेण परिपक्वाः निर्मलांतःकरणाः संत एव तत् विश्वाख्यं परं ब्रह्म समाश्रित्य प्राप्नुवंति ॥
तच्छब्दस्य जगद्वाचकत्वं तदिति वा एतत्तस्य मरुलोभं तस्य नाम भवतीति ॥ ॐ तत्सदिति निर्देशो ब्रह्म
णो निर्देशस्त्रिविधः स्मृत इत्यादि स्मृतेः ॥ महाभारते तु भगवानेव । एको विष्णुर्महद्भूतमिति
हानधर्मोक्तेः ॥ तपोपवित्रमिति ॥ तपो ॥ यथार्थज्ञानवतः । तप आलोचन इति धातोः ॥ सप्रत्य
यांतस्य रूपं ॥ यद्वा ॥ तपो ॥ शत्रुसंतापकस्य विष्णोः ॥ तप संतापे इति धातो रूपं ॥ यत्र पवित्रं च
क्रं दिनस्पर्शे आजदित्य एव विशिष्टे वैकुंठादिस्थाने विलसंत्यास्तं वर्तते ॥ अस्य चक्रस्यांतं तपः । ४५
रश्मयः शोभंतो दीप्यमाना अस्थिरन्न ॥ न तेषु विविध फलदातृत्वेन तिष्ठंतीत्यर्थः ॥ तथा
स्य पवित्रस्य आशवः शीघ्रगामिनः व्याप्तिनो वा । अश्व्ऌ व्याप्ताविति धातोरुण्प्रत्ययांतस्य
रूपमेतत् ॥ तं तवोरश्मयः पवीतारं तत्पादि संस्कारेण तावेतं पवीत्रीकुर्वाणं सज्जनवर्गम

वंति रक्षंति ॥ पवीतारमित्येतत्पूङ् पवने इति धातोस्तृच्प्रत्ययांतरूपं ॥ न केवलमवंति किंतु चेत
सा सम्यग्ज्ञानदानेन दिविस्पृष्टे वैकुंठादिस्थाने अधितिष्ठंति ॥ पवी वैकुंठाद्यधिष्ठापयंती
त्यर्थः ॥ अधिशीङ्स्थासां कर्मेति सूत्रेण द्वितीया विभक्तिर्ज्ञेया ॥ चरूषदिति ॥ चरूवा संसार से
नायां दुर्गमत्वेन सीदंतीति ॥ चरूषत् ॥ तथापि एपेनः ॥ शंसनात्पारद्रसमो जीवनमो गोविंदः गोविंद
स्य कारांतर्लक्षं दसंख्याधीयुधानि शंखचक्रादीनि विभ्रत्वाभिप्राणः इत्यसः ख्वणशीलः ज्ञाने ।
नाई अपाम इति अप्रयोगः ॥ कर्मवाचीप्रसिद्धः ॥ धातुः कर्मणि ऊर्मिरुत्कटभोगं स च मानः सेव
मानोपि महिषः महान् अभ्यभिचरितजत्वा मरुत्वं आलः सन्नस मुरंतीयसागर जलाणतु
रीयं धाम चतुर्थं स्थानं विवत्ति सेवते ॥ मुक्तो भवतीत्यर्थः ॥ मुक्तस्थानस्य दीर्घसागरस्य ॥ च
तुर्थस्थानत्वं मोक्षधर्मादिस्पष्टं ॥ गत्वां चतुर्थं गच्छंति नारायणपरायणा इति भगवन्निममा
त्मने । येन देवा इति रूपाव मान्त्वः ॥ देवलोकाविशेषाः ॥ येन पवित्रेण चक्रेण देवाच लोकस्य
आत्मानं सदा पुनते पवित्री कुर्वते तेन पवित्रेण सहस्रसंख्याकधारावता । मां च तस्या पुनंतु

इति वा कार्यं ॥ पवित्रेणेति ॥ हे यत् देवीअम्मानन्हे देवाग्ने नकृतन्तन्त्र्यन्त्तुज्योति सोमादिकृत्सु फल
५६ प्राप्त्यर्थं ॥ कृत्वा क्रतुनास्वंकल्पितफलेन त्वाम्सु कृत्वा देन पवित्रेण मां पुनीहि यत्तदिति । हे अग्ने ते
तव अर्चिषि ज्वालायामन्तराम ध्ये विततं यत्पवित्रं वर्तते । तेन पवित्रेण ब्रह्मवेदोन गवान्वामां पुना
तु । चरणमिति । पवित्रयतीति पवित्रं विततं पुराणं प्रगततनं यच्चरणं चक्रं वर्तते ॥ येन चरणेन ॥
दुष्कृतानि तरति ॥ शुद्धेन तेन पवित्रेण अरातिं अनपकारि तेन शत्रुं भक्तं पाप्मानं पापरूपमन्ना
घस्तानं अतितरेम अस्मति अत्र तावतं विश्व । चरणं पवित्रमिति ता त्रपुरुषं हि ॥ जो बुलीव हेरपा पा
त्र ॥ सकीयं केनाहुत पूर्णं दीर्घे शिति वत । एवमन्या अपि श्रुतयस्तदर्थे प्रमाणत्वेनोक्ता ॥ अत्र प्रमे
श्वभ्रमातो च्यते ॥ अत्र कश्चिदाह । नवतु ततप्तचक्रादिधारणं श्रुतिस्मृत्यादिप्रमाणसिद्धं तथापि ५६
वेदभ्रष्टविप्राधिकारिकं ॥ तथा च स्कान्दे यत्तवैनवरखंडे ब्राह्मिं शगधमा येगो तमशा पंचुरस्तु लोकां
पांचरात्रे च कापाले तथा कालामुखेपि च । शाक्ते च दीक्षिता यूयं भवेत ब्राह्मणाधमाः ॥ वौ देच्या
हन्यते चैव तत्पापासु पतेपि च ॥ तथा तत्रैव । चार्वाकः शंखचक्राद्यैस्त्वदीये रंकिता जनाः ॥

अन्वितत्वैर्भस्माश्मोहाहुवेषुश्वाँसयोईयोरिति ॥ सांत्वपुराणेपि ॥ पंचरात्रं भागवतं तंत्रं वैखा
नसाभिधं । वेदभ्रष्टान्समुद्दिश्य कमलापतिरुक्तवानिति ॥ सूतसंहितायां च । अस्यंत स्वर्जितानां ।
हि द्विजानां वेदमार्गतः ॥ पांचरात्रादयो मार्गाः कालेनैवोपकारकाः ॥ इति कूर्मपुराणे भविष्यत्काण्डे पा
द्मेपि । ब्रह्मणां मनसाप्य वा सो लिंगचक्रादिधारणं भ्रष्ट धर्मरतानां हि तेषां नास्ति पुनर्भवः ॥ विप्रस्येत
द्विगर्हितत्वात्तापश्चित्तमुदीरितमित्यादि बहुवचनदर्शनाच्छंखचक्रादिधारणं वेदभ्रष्टद्विजविष
यमिति । तदसंततत्र्यथां नवजो कनजनिता ज्ञानविज्ञानप्रमाणमात्रं पतनप्रां वचसां नारदीयपंच
रात्र श्रुतिरित्यागमविषयत्वात् ॥ तथा हि पाद्मे पातालखंडे एकस्मिन्नध्याये गोतमशापप्रस्ता
वे । गोतमेनाभिशप्तास्तु द्विजाः उद्विग्नमानसाः ॥ केचित्कालेन तिक्रम्य ते पुत्रवे स्वित्तमन्त्यपु
रूपसाप्रणिपातेन गोतमं ते ऽस्य पूजयन् ॥ अनुग्रहाय विद्वांस्पिता विप्राग्न्मानो वा च कृपया क मुनिः ॥
गौतमश्चीणपापास्तु शापस्पर्शातनभीषवः ॥ स्म यदीतमनास्तेषां गोतमो मुनिसत्तमः ॥ उवाच
मुनयः किं वा दहामि निष्फलं वा ॥ न तावद्दस्मन्नी प्रसन्नं युष्माकं पदं भीक्षितां मुनयकश्चतु ॥ नास्मा

कमलिपवां छास्तिवरऽरेषु मुनिसत्तम॥ शापदग्धाः कृतिनस्तस्मा छापं निवर्तय॥ गौतमउवा
च॥ अनन्तलोक एतेभ्यो यूयं मद्भक्तिकाङ्क्षिताः॥ तेषां मार्गप्रवेशोपि वेदमार्गप्रवर्तकाः॥ न विशेषयथा
४१ पूर्वमत्र संस्मरणं न द्विजाः॥ वेदनाशाय दुष्टानां यत्तं तन्त्रे दिविरूक्तवान्॥ श्वेतद्वीपे नारायणमोक्षकामा
यधीमते॥ वेदाविकं देतत्तत्रस्थ वेदार्थं वंदितं॥ न तत्र हीदाचाराणां २०शंखचक्राङ्कधारिणां॥ यु
ष्माकं वेदमार्गेपि न नश्यतीम मा कृथाः॥ वेदशास्त्रार्थवेत्तापि योऽस्य नेन नसंस्कृतः॥ न सर्वे दाफलं
धत्तेप थागो भारवाहकः॥ सर्ववेदपर्यंतं तत्र नारदं पांचरात्रकं॥ अन्यानि यानि तंत्राणि हरिणा
च हरेण वा॥ कृतानि कृष्ण निन्द्यानि मोहकानि न संशयः॥ तत्र मे विहिता धर्मा विरुद्धा वेदवाहि
नां॥ अतस्तत्र न निन्दाऽस्तु युष्माकं मत्प्रसादतः इति॥ ब्रह्माण्डे पि षोडशाध्यायो नारायणाख्यते
तं यत्तत्र वेदा पवर्त्तितं॥ तदेवदैवैर्हि कैश्चित्संतान्यं हि तमशापतः॥ भारतेपि मोक्षधर्मे नारदीय ४१
पांचरात्रस्य महिमोक्तः॥ पंचरात्रस्य कृत्स्नस्य वक्ता नारायणः॥ परः॥ सर्वेषु च नृपश्रेष्ठ ज्ञाने वृ
त दृष्टिष्यते॥ यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः॥ न चैनमेवं जानंति तमोभूता विशांपते॥

तथा॥ वेदमेकं सांख्ययोगं योगारएपकमेव च॥ परस्परांगान्येतानि पंचरात्रं च कथ्यते॥ पंचरात्र
विदो ये तु यथाक्रमपरान्नृपः॥ एकांतभावोपगतास्ते हरिं प्रविशंति ते॥ एष एकांतिनो धर्मो नाराय
णपरात्मकः इति नारदीय पांचरात्रस्य वेदात्मकत्वमुक्तं॥ पाद्मे माघमाहात्म्येपि विज्ञाणमवेक्ष्य
वत्वे निर्दिष्टः॥ अवैष्णवो हतो विप्रो हतं श्राद्धमदक्षिणं॥ तथा॥ श्वपाकमिव नेक्षेत लोके विप्र
मवैष्णवमिति॥ शैवतत्त्वस्य निंदापि मित्याह तरायाः॥ शैवा पाशुपतान्स्पृष्ट्वा लोकायतिकनास्तिका
न्॥ विकर्मस्थान्द्विजाञ्छूद्रान्सवासाज्जलमाविशेत्॥ स्कांदे॥ हरेर्यश्चाव यो नेदं न करोति महा
मतिं॥ शिवञ्च नाः स विज्ञेयो महापाशुपतश्च सः॥ ब्रह्मवैवर्ते॥ कर्मसंन्यासिनं विप्रं ब्रह्मोह
पितिवाहिनं॥ कर्मभ्रष्टोऽनयन्नष्टं विकर्मस्थं त्यजेन्नरमित्यादिना॥ वसिष्ठसंहितायामपि॥
सर्गो हि आत्मनः स्वस्यायै स्वत्वेन चोदिता॥ इतरेपि त्रयो वर्णा ब्रह्मणेन विष्णुसेवनात्॥ तस्मात्त्व
वैष्णवापि द्विजाः ब्रह्महत्या हि जन्मसत्तमाः॥ अवैष्णवत्वं विप्राणां महापातकसंमितमित्यादिना॥ वै
स्रवशः कृतसंस्कारविशिष्टस्य वाचकोः॥ मत्पाद्वनीयादिशब्दवत्॥ वैशेषिकनयानसाद्यागमो

तद्दीक्षां हित्वा मोहितवैष्णवः इति कालजनितोये ऽमोऽथवा वामोर्त्के ॥ वैष्णवं द्विविधं प्रोक्तं बाह्यमाभ्यं
तरं तथा शंखचक्रादिभिर्बाह्यमांतरं । वितरागत्वेति पाप्मो तेभ्य तस्माच्छ्रुतिस्मृ- त्यागमादिसर्वत्र
५८ मार्गेण सिद्धत्वाद्ब्राह्मणैः शंखचक्रादिधारणं कर्तव्यमिति सिद्धं ॥ तत्प्रकारस्तु पांचरात्रे निरू
तः ॥ शायन्यां चैव बोधिन्यां द्वादश्याकाले विशेषतः ॥ तप्तशंखादिकं धर्मं विधानेन समन्वितं ॥ सु
पुष्पशोभितरम्ये वितानध्वजशोभिते ॥ मंडपे च गृहे देवं धूपैर्दीपैर्निवेदनैः ॥ आराधनं ततः
कुर्याद्विष्णोः परमात्मनः ॥ स्वर्णेन कारयेच्चक्रं शंखं रौप्येण कारयेत् ॥ षट्कोणैश्च समायुक्तं
षडरं समन्वितां मध्ये अग्रे सन्प्रोक्तं बाह्ये वसुदलैर्युतं ॥ मूलमंत्रेण संप्रोक्तमेतच्चक्रमि
होच्यते ॥ मध्ये तद्बीजसंयुक्तं शंखं कुर्याद्विचक्षणः ॥ स्थाप्य पंचामृते ऽमु चैरकं तत्पुरतो हरेः ५८
ध्यात्वा सुदर्शनं तस्मिन् सहस्रारं महौजसं ॥ कोटिसूर्यसमप्रख्यं तेजसा भुवनत्रये ॥ षडक्षरे
णमंत्रेण पूजयित्वा विधानतः ॥ जपं कुर्यात्ततः पश्चात् घृतसाहस्रसंख्यया ॥ अष्टसहस्रं तु वाज
त्वा पश्चाद्धोमं समाचरेत् ॥ द्वादशमात्रं चतुर्दिक्षु होमये वसवो दिशः ॥ उपलिप्य स्थंडिलं तु चतु

रस्रं सुशोभनं ॥ तन्मध्येऽग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधानतः ॥ अग्न आयाहीति तच्च मिंद्रो बलेन
चेतया प्रजापते नेति ऋचं विश्वेदेवास इत्यृचं । त्वया वयं सधन्येति जुहुयात्सप्तचेतसः ॥ पश्चात्तु
वैष्णवैः सूक्तमंत्रैर्विष्णुप्रकाशकैः ॥ पवित्रं ते इति ऋचा पूर्णाहोमं समाचरेत् ॥ विष्णो रराटमसि
चयेन देवा इति चित्ति ॥ एवमाज्येन होतव्यं मंत्रैः गुणैर्दर्वके ॥ पश्चात्सुदर्शनं तस्मिं छंखं चाग्नौ
विनिक्षिपेत् ॥ दक्षिणे च भुजे पूर्वं चक्रेण प्रतपेत्ततः ॥ वामांसे प्रतपेत्पश्चाच्छंखेनैव द्विजोत्तमः ॥ शी
तोभूते विनिक्षिप्य पूजयेत्तत्समाहितः ॥ ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥ एवं यो वि
धिवद्धृत्वा शंखचक्रादि वैष्णवः संसाररोगान्मुक्तो विष्णुलोकं स गच्छतीति ॥ इति श्रीमद
नंतनद्वैतचित्रे विधानपारिजाते शंखचक्रादिधारणविधानं समाप्तं ॥ ॥ अथ पाठकु
ज्ञेयं वाहस्यं विशेषोक्तं विष्णौ ॥ आषाढकासिते पक्षे हेतु मेयं त्रयश्रवणे रवेस्तु ॥ संगमे चैव गोत्रकं वा
द्वादशीं द्वादशीं हरेत् ॥ अस्यार्थः ॥ आषाढभाद्रपद कार्तिक द्वादशीषु भक्त्या धमध्यमनेन रवितिथिः
क्रमेण योगसतितत्र न पारणं कुर्यादिति ॥ अत्र विशेषो विष्णुधर्मे ॥ मैत्राद्यपादे स्वपिती हरि

विष्णुः ॥ पौर्णमास्यामाहेप्रतिबोधयेत् ॥ अतेऽस्य मध्ये परिवर्तयेति सुप्तिप्रबोधं परिवर्तनमेव वर्ज्य
४९ मिति ॥ अत्र विष्णुशयनोत्सव उक्तो हेमाद्रौ ब्राह्मे ॥ एकादश्यां तु शुक्लायामाषाढे भगवान् हरिः ॥
भुजंगशयने शेते क्षीरार्णवजले सदेति । स्कांदे तु द्वादश्यामुक्तः ॥ आषाढाद्येषु मासेषु मिथु
नमाधवस्य च द्वादश्यां भुजंगपदे च प्रस्वापवर्तनोत्सवः ॥ तथा द्वादश्यां संधिसमयेन ह्यत्राण
मसंभवे ॥ आषाढकासितपक्षे प्रशमनावर्तनादिकमिति वराहे च द्वादशीति पारणाहापत्ते ह
णपारणाहे पर्वरात्रे घंटाद्यं वाद्यमनुकुर्विति विष्णुधर्मोक्तेः ॥ अत्रैकादश्युपोष्य द्वादशी शूद्रश्यो
हेमाद्रौ दिन अवस्थानस्थाः ॥ अथ मत्स्यो जन्मा सेतति नकार्यं ईशान स्पर्शवर्जि विष्णोः श
यनं । परिवर्जये दितिकाला दर्शोक्तेः । यत्तु । एकादश्यां तु यः स्तीयाः संक्रांतो कर्कटस्य च ॥ ४९
आभाव्या ना नयोत्स्या चातुर्मास्यव्रतक्रियामिति प्र लवे वर्त्त वचनं चातुर्मास्यव्रतविध्य
पकं ॥ तन्मलमासे विरुद्धं । मिथुनस्थो यदा भानुरमावास्या द्वयं स्पृशेत् । द्विराषाढः स
विज्ञेयो विष्णुः स्वपिति कर्कटे इति हेमाद्रौ मो रूप कृत्यको ॥ अत्रैव चातुर्मास्यव्रतारंभ उक्तो

नारदे ॥ आषाढे तु सितेपक्षे एकादश्यामुपोषितः ॥ चातुर्मास्यव्रतं कुर्यात् यत्किंचिन्नियतो न
रः इति ॥ अस्य नित्यत्वमुक्तं तत्रैव ॥ वार्षिकांश्चतुरो मासान् वाहयेत्केन चिन्नरः ॥ व्रतेन नो चे
दाप्नोति किल्बिषं वत्सरोद्भवं ॥ असंभवे तुलार्के पि कर्तव्यं तत्सपूर्णम् इति ॥ इदं शुक्लास्वा राव
प्यारब्धं पूर्वं चेति स्कांदे कार्यं नरो शयने नभो ऽर्च प्रभुक ग्रर्वो ने वाति थे । एवं इत्वे चिंतये व्राहे चातु
र्मास्यविधौ नर इति वदुगा ॥ गर्गोक्तेः । प्रथमा इंतस्त नन्व वत्से व ॥ आरंभे रूपणे नास्ति ना
रवे तु रूपणमिति । विष्णुस्मृतेः ॥ आशौचेत्यवमेव ॥ अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा
पुमान् ॥ व्रतमेतन्नरः कृत्वा सर्वपापैः प्रमुच्यते नर इति । स्कांदोक्तेः ॥ इदं प्रतिवर्षं कार्यं ॥ प्रति
वर्षं च यः कुर्याद्देवं देवेशं स्मरन् हरिं ॥ ह्रलंतेति प्र तेन विमाने नार्कवर्चसा ॥ मोदते विष्णुलो
के सो यावदाभूतसंप्लवमिति भविष्योक्तेः ॥ इदं वा रहेनदेव कार्यं ॥ नित्यत्वा
दशिवेवा संभव नानोयोगणनायके । कृत्वा व्रतमी द्विजश्रेष्ठ न्यथोक्तफलमाप्नुयात्
दितिब्रह्मवैवर्तोक्तेः ॥ अथ शयनोत्सवः ॥ देवं संपूज्य विधिवद्ध्यानमारोप्य भक्तितः ॥ जला

शयं ततो नीत्वा कुर्याद्देशयनं हरेः ॥ स्तुत्वा पुरुषसूक्तेन अंजस्य पादद्वय विप्रेशपर्यंकव
५० र्ये स्मिन्कतममति विभूषिते । श्वेतद्वीपांतरे देवं कुरु निद्रां जगत्पते ॥ इति मंत्रेण तं देवं स्वापयि
त्वा प्रणम्य च ॥ श्वेतद्वीपे नोगिनाथे योगनाथे स्थिते त्वयि ॥ चातुर्मास्यव्रतेनृत्तां हेरिज समीप
ते मम ॥ जवान्नु तांशं खरुस्तः दृः मंम त्रभु द्रिष्ये दितिरामार्चनचंद्रिकायां ॥ व्रतग्रहणप्रकार
स्तत्र हेमाद्रौ भविष्ये । मः ह्यापजां ततः कुर्याद्दिष्ट देवदेवस्य च क्रिणः ॥ आतिकुसुममालानिर्म
त्रेणानेन पूजयेत् ॥ मंत्रः सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं ॥ विबुद्धे च विबुध्येत प्रसन्नो
मे भवाच्युत ॥ एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः ॥ प्रणाषेताग्रलो विष्णोः कृतांजली
पुष्पस्तथा ॥ चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि । इमं करिष्ये नियमं निर्विघ्नं कुरु केशव ५०
कवा इदं व्रतं मया देव गृहीतं पुरतस्तव । निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव । गृहीते
स्मिन्व्रते देव पंचत्वं यदि मे भवेत् ॥ तदा भवतु संपूर्णं त्वत्प्रसादान्महापते ॥ गृहीतेस्मिन्व्रते दे
व यद्यपूर्णे म्रियेह्यहं ॥ तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दनेति ॥ अत्र व्रत विशेष उक्तो भा

गंवार्चनरापिकायां ॥ भविष्ये ॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा । दुग्धमाश्वयुजे मासि कार्तिके
द्विदलं सजेदिति ॥ स्कांदेपि ॥ चत्वार्यग्रतानि निःस्थानि चतुरश्चेम वार्षिकान् । प्रथमे मासिक तत्वं नि
त्यं शाकव्रतं नरैः । द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमं ॥ पयोव्रतं तृतीये तु चतुर्थे तु निशामय ॥
द्विदलं बहुबीजं च वृंताकं चैव वर्जयेत् । निस्पाद्येतानि विप्रेंद्र व्रतान्याहुर्मनीषिणः । जंबीरं राजमा
षांश्च मूलकं रक्तमूलकं कूष्मांडमिक्षुदंडं च चातुर्मास्ये त्यजेद्बुधः । विशेषाद्दर्शधात्रीक
ष्मांडं तिंतिडीणी त्यजेत् । जीर्णं धात्रीफलं ग्राह्यं तद्रिका यस्य शोधने । तौयस्मो रक्षेरम्भेपि वार्षिकां
श्चतुरो मासान्प्रसुप्ते वै जनार्दने । मंचखट्वादिशयनं वर्जयेद्भक्तिमान्नरः ॥ अनृतो वर्जयेद्वा
र्यां मांसं मधु परौदनं । पटोलं मूलकं चैव वृंताकं च न भक्षयेत् । अन्नं दग्धं वर्जयेद्दूरान्मसूरं
सितसर्षपं ॥ राजमाषान्कुलित्थांश्च आढकी धान्यं च वर्जयेत् ॥ शाकं दधि पयो माषाः क्रमा
च्छ्रावणादिषु संत्यजेत् ॥ अत्र शाकशब्देन शिग्रु मनेव्वेति शाक इति व्युत्पत्तेः सूपादेरपि त्यागापत्ते
योगरूढत्वेन शाकस्य दशविधत्वं ज्ञेयं ॥ तदाह कोशकारः ॥ मूलपत्रकरीराग्रफलकां

डाधिरूढकाः॥ लक्षुणं कवचं चैव तिशाकं हराविधं स्मृतमिति॥ मसूरमाषौ काद्रिपत्रं स्मृतं॥ करीरं
५२ वंशांकुरं॥ अयंनवपल्लवरूपं॥ अधिरूढमंकुररूपं। आचारदीपेपि। वंताकं च कलिंगं चविंबी
हुबदन्ति सदा॥ द्रव्यं यस्य जीर्यति तस्य दूरतरो हरिः॥ अपरार्के देवलः॥ अस्ति चर्मतयाशो चेन
त्य मामिषवर्जनव्रते येतानि चत्वारि वरिसानीति निश्चयः॥ आमिषाणि पाद्मे॥ प्राणि अंग च
एं चर्मबिजं बीरं वीजपूरकं। अयज्ञशिष्टं मासादियच्चिक्षीर निवेदितं। दग्धमन्नं मसूरं च
मांसं चेत्यष्टधामिषं॥ अन्यत्रापि। गोछागी महिषी क्षीरादन्यदुग्धादि चामिषं॥ अन्येन स्मृ
ताः। श्रोत्रकान्नं पर्युषितं तथा॥ क्षिप्रकाद्रसाः सर्वे लवणं क्षत्रिमं तथा॥ ताम्रपात्रस्थितं ग
व्यं जलं पल्वलसंस्थितं आत्मार्थपाचितं चान्नमामिषं तत्स्मृतं बुधैः॥ विष्णुधर्मोत्तरेपि। च ५२
तुर्ष्वपीह मासेषु हविष्याशी नपापभाक्। वृंताकं संधितं चैव वस्तुसंदेवे विवर्जयेत्॥ संधितं
वत्सांतरखरस्तु तगवादिषु दुग्धं॥ लवणेशाकं चेत्यन्ये॥ हविष्यं तु नवविष्ये॥ हैमंतिकं सिता।
स्विन्नं धान्यं मुद्गा यवास्तिलाः॥ कलायकंगुनीवारवास्तूकं हिलमोचिका। षष्टिका कालशा

कं कैच मूलकं केलरतं॥ कंदसैंधवसामुद्रे गव्ये च दधिसर्पिषी॥ पयोऽनुद्धृतसारं च पनसाम्रहरी
तकी। पिप्पली जीरकं चैव नागरंगं च तिंत्रिणी। कदलीलवलीधात्रीफलान्यगुडमैक्षवं॥ अ
तैलपक्वमनयोर्हविष्याणि प्रचक्षते इति॥ अतांतराणुकानि हेमाद्रौ नविष्ये। स्नानरोगाम
नुक्तो धर्मार्थं सुदृढव्रतः। अग्न्ह्यपान्नियमाने तातान्द तद्धावनपूर्वकं। तेषां फलानि वक्ष्यामि त
त्कर्तृणां पृथक्पृथक्॥ मधुरस्वरो भवेद्राजन् सुरूपो गुडवर्जनात्॥ तैलस्य वर्जनं कृत्वा सु
न्दरांगः प्रजायते॥ योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात्॥ तांबूलवर्जनाद्भोगी रक्तकंठ
श्च जायते। घृतत्यागे च लावण्यं सर्वस्निग्धतनुर्भवेत्॥ शाकपत्राशनाद्रोगी अपक्वाशोऽम
लो भवेत्॥ भूमौ प्रस्तरशायी च विप्रो ह्यनुचरो भवेत्। एकांतरोपवासेन ब्रह्मलोके महीयते
मौनव्रतेन वै यस्तु तस्याज्ञा स्खलिता भवेत्॥ भूमौ भुंक्ते सदा यस्तु स पृथिव्याः पतिर्भवेत्।
ग्रन्थिदानं शतं यस्तु करोतिस्तत्रिपाठकः॥ हंसयुक्तविमानेन स च विष्णुपदं व्रजेत्॥ अयाचि
तेन चाप्नोति पुत्रान् धर्मान्नशेषतः॥ पर्णान्नकालेनोत्तायः कल्पस्थायाचवे द्विवि। पर्णेषु

यो नरोऽतुं ते कुरुक्षेत्रफलं लभेत्। गुडवर्जी नरो दद्यात् तन्दुलांस्ताम्रभाजने॥ सहिरण्यं नभस्ये छ
५२ लवणस्याप्ययं विधिः॥ मधुत्यागे वेतुयो विप्राः। शिवस्याग्रगामर्चयेत् पंचवर्णैस्तदा नित्यं स्वस्ति
के। पय्यकेस्तथा॥ सर्पातिरुद्रजो कंहिमाणपस्यमवाप्नुयात्। भार्गवार्चनेन तु॥ शयनीकोधनीम
ध्ये शमीदूर्वा पमार्गकैः॥ भृंगराजेन हेवोस्तु नार्चयीत कदाचन। नखलोमादिकानां तु धारणं
धर्मसाधनमिति॥ स्कान्देऽपि॥ एकांतरं ह्यां तरे वा कुर्यात्मासोपवासकं॥ अनोदनं फलाहारं न
क्तव्रतमथापि वेति॥ ब्रह्मवैवर्ते। लवणं वर्जयेद्यस्तु चातुर्मास्ये द्विजोत्तम॥ दत्वा तु दद्यात्तिलांस्तेन
लवणं च द्विजातये॥ व्रतांते च घृतं तस्य तृप्यादि तन्नयाम्भुजा॥ तृप्यादितन्नया धेनुः॥ एवमन्या
न्यपि व्रतानि शक्तितः कार्याणि व्रताधिकारिणो न विध्ये॥ अनग्नयस्तु ये विप्रास्तेषां श्रेयो वि ५२
धीयते। व्रतोपवासनियमैर्नानादानैस्तथा नृपेति॥ अनग्निग्रहणं तेषामाचश्यकार्यं। न त्वि
तरनिरासाय॥ आहिताग्निरनग्निर्वा यतिर्ब्रह्मव्रतादिकं॥ शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वा
त्कर्तुमर्हति॥ वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेति विष्णुधर्मे विशेषोक्तेः॥ अत्र स्त्री

णामप्यधिकारः॥ भार्यापत्युर्मतेनैव व्रतादीनाचरेत्स्त्रिदेतिकात्यायनस्मृते॥ यत्तु स्कांदे नास्ति
स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं॥ भर्तृशुश्रूषयैव तालोकानिष्टान्व्रजंतिहीति तत्तु भर्त्र
नतुज्ञाविषयमिति निबंधकाराः॥ व्रतनव्रतारंभकालस्तु रत्नमालायामभिहितः। सोमसौम्य
गुरुशुक्रवासराः॥ सर्वकर्मसु भवंति सिद्धिदाः। भानुभौमशनिवासरेषु नो तत्क्षमेव खलु कर्म
सिद्ध्यति। विरुद्धसंज्ञाइह ये च योगास्तेषामनिष्टः खलु पादमाद्य॥ सवैधृतिस्तु व्यतिपातना
मा सर्वोप्यनिष्टः परिघस्य चार्द्धं। इति स्वस्त्ययोगेषु प्रथमे सव ज्ये व्याघातसंज्ञे नव पंचशूले गंडेऽति
गंडे च षडेव नाड्यः शुभेषु कार्येषु विवर्जनीयाः॥ नक्षिष्णुमायाच्छतिकृते च विष्कं विघारिघाता
दिकमत्र त्तिकं। व्यवहारस्तु सुज्ञेयः। विशेषस्तु सर्पि। णीसुतुस्तिते पचोछस्येचैव तु वह्निकी
सपिंडपास्तु सुखेवाज्यं वह्निकाष्ठमेव च॥ माधवीये तु। विहितियदा हन्ति तिथेरपराह्णगामिता
पूर्वाह्णेजानिशिततुपमुन्नाचपूर्वे। अस्तमयापि। दिनत्रयं यद्युदयास्तौ रात्रिमध्यायाहादिवा॥
नत्या आसुनकार्ये शुभाशुभे देवपुरांतनाइति। तिथिमाहस्यस्वव्रतः। उदयंस्यातिथिर्याहि न त्वे

द्दिनमध्यगात् ॥ सार्वं डानव्रतानां स्याद्धारेऽन्यस्य समापनमिति ॥ देवलः ॥ अनुक्त्वा प्रातराहारं स्ना
५३ त्वाचम्य समाहितः ॥ सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत् ॥ व्रतोतं कार्यमुक्तमाग्नेये ॥ स्नात्वा
व्रतवताः सर्वव्रतेषु व्रतमूर्तयः ॥ पूज्याः सुवर्णमय्याद्याः ॥ शक्त्या वै भूमिशायिना ॥ जपो होमश्च
सामान्यं व्रतांते दानमेव च ॥ चतुर्विंशद्वादश वा पंच वा त्रय एव वा ॥ विप्राः पूज्या यथाशक्ति ॥ तेभ्यो
दद्याच्च दक्षिणामिति ॥ अत्र विप्रा इति पुल्लिंगनिर्देशात्पुरुषा एव भोज्याः ॥ न तु स्त्रीयः ॥ विरूपे क
र्मस्य प्रमाणांतरं विना ऽयुक्तत्वात् ॥ एवं सर्वत्र भोजनादावपि ज्ञेयं ॥ एतेनैकस्य ब्राह्मणस्य
भार्या भोजनमपि परास्तं ॥ बहुत्वस्यैकपदस्थस्य ब्राह्मणान्वितत्वेन भोजनान्वयाभावादि
ति पार्थसारथिमिश्राः ॥ विष्णुः ॥ अनुक्तद्रव्यं तत्संख्या देवताश्च तिमात्रपः ॥ सौवर्णी राजती ता
म्री वस्त्रजा मार्त्तिकी तथा ॥ चित्रजा पिष्टजेयोन्या निर्मिता नु रूपतः ॥ आभाषा त्यलपर्यंते क ५३
र्तव्या शक्त्यवर्जिते ॥ उद्यापनार्थं ॥ कौर्मे विष्णुपुराणे विधावो निहिता ॥ कुर्यादुद्यापनं तस्य समा
प्तौ यदुदीरितं ॥ उद्यापनं विना यत्तु तद्व्रतं निष्फलं भवेत् ॥ यदि जोद्याप नं नैकर्त्तुं शक्तानुगुणत

स्यरेत् ॥ वित्ताद्युसारतोऽदया दुक्तोद्यापने व्रते ॥ गांचैव कांचनं दद्याद्व्रतस्य परिपूर्त्तये ॥ उश
नोतु नारदीये ॥ सर्वेषामप्युद्यापने तु यथोक्तकरणं विना ॥ विप्रवाक्यं स्मृतं श्रेष्ठं व्रतस्य परिपूर्त
ये ॥ तथा विप्रवचो यस्तु नकुर्यात् ॥ मनुजः शुभं ॥ अकृत्वा दक्षिणां पापः स याति नरकं ध्रुवं ॥ भा
रते ॥ व्रतोपनिषदेचैव सर्वकर्मसु दक्षिणा ॥ सर्वत्रतु मयो द्विष्टा भूमिर्गावोथ कांचनं ॥ शिवनेत्रो
द्भवं यस्मात् सर्वत्रापि तत्ववत्सलन् ॥ अथ मंगलं तत्र वनेन्द्र चकायो पुर्वर्जयेत् ॥ व्रतिता परान्नवर्ज्य
मुक्तं देवीपुराणे ॥ व्रते चतीर्थे ध्ययने श्राद्धेपि च विशेषतः ॥ परान्नभोजनाद्देवी यस्यान्नं तं
स्य तत्फलं ॥ द्दत्य पिय तिधाले चापि अतिरेकेण ॥ तयोः पाकनिषेधात् ॥ आपस्तंबेन त्रितयस्ना
यी मितास्त्ररो गुरुदेव द्विजार्चकः ॥ क्षारं क्षौद्रं च लवणं मधुमांसानि वर्जयेत् ॥ त्रिंशन्मुहूर्तं वै दत्ते
शेषं सस्येगोधूमकोद्रवौ ॥ धान्यकं देवधान्यं च शमीधान्यं तथैव च ॥ स्विन्नधान्यं तथा पण्यं मे
षहस्तारमणं स्मृतम् इति ॥ गृहीतव्रतस्यागे प्रायश्चित्तं ॥ एवं व्रतं गृहीत्वा यो नाचरेत्काममोहितः ॥
जीवन् भवति चांडालो मृतः श्वा चापि जायते ॥ न त्यायश्चित्तं स्कांदे ॥ क्रोध प्रमादलोभा

ह्यह्यव्रतभंगेन भवेच्च हि। दिनत्रयं न भुंजीत मुंडनं शिरसोऽथवेति प्रायश्चित्ते॥ लोकेरतिक्रांतव्रतानुष्ठानं
५४ कालांतरे नास्तीति गम्यते। इदं प्रायश्चित्तं शक्तपरं॥ अशक्तस्य तु हेमाद्रौ॥ उपवासासमर्थश्चे
देकं विप्रं तु भोजयेत्॥ तावद्धनानि वा दद्यात् यद्भक्ष्याद्द्विगुणं तथा॥ सहस्रसंमितां देवीं जपेद्वा प्राण
संयमान्। कुर्याद्वा द्वादशसंख्याकान् यथाशक्त्या तु रोवरदृति॥ अपरार्के देवलः॥ ब्रह्मचर्यं तथा शौ
चं सत्यमामिषवर्जनं॥ व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः॥ मात्स्ये॥ तस्मात्तत्तोपवासेन न
स्नानमभ्यंगपूर्वकं। वर्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप॥ अस्मे पिवृतं॥ निषमास्तत्र तत्र वेहृप्य
ते। स्त्रीजने विशेषो हेमाद्रौ॥ गंधालंकारतांबूलपुष्पमालानुलेपनं॥ उपवासेन दुष्यत
दंतधावनमंजनं॥ विधवाप्यतिमार्गेण कुमारी चापि दृश्य इति॥ विष्णुधर्मे॥ समस्तेषूपवा ५४
सेषु कुमार्या पत्युवासिनी॥ धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च॥ विधवा शुक्लवसने
मेकमेव हि धारयेत्॥ मनुरपि॥ पुष्पालंकारवस्त्राणि धूपगंधानुलेपनं॥ उपवासेन दुष्य
ति दंतधावनमंजनमिति॥ यद्यपीदं सर्वोपवासविषयत्वेन प्रतीयते॥ तथापि सौभाग्यार्थक

कनकवरणाद्युपवासविषयं॥ न त्वेकादश्युपवासविषये। असकृज्जलपानाच्च सकृत्तां
बूलचर्वणात्। उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्। इति देवलेन त्रिधेषु धातः। यत्तु हारी
तेनोक्तं कालवते पितृन्निवेध नक्तं। अंजनं रोचनं चैव गंधं सुमनसस्तथा॥ व्रते चैवोपवासे च नित्य
मेव विवर्जयेदिति तत्तु तत्रोक्तपुण्यकव्रतमात्रविषयं न तु सर्वविषयं॥ सर्वोक्तवचनविरो
धादिति मदनरत्नेऽउक्तं। शिवधर्मे॥ दानं बलिनिनियमाः स्नानं ध्यानं हुतं जपः। यत्नेनापि कृतं।
सर्वं कुद्धस्य तु वृथा भवेत्। अत्र विशेषो हेमाद्रौ वाप्ने। गणिलिस्मृति कन्यकुमारी वा
परोगी॥ यद्यशुद्धा तदान्येन कारयेत्प्रयतो स्वयमिति। कुंसोऽप्येवं लिंगस्यापि वदितत्वा
त्। तेन पश्चिमे तयस्तु युक्तं दन्येन कारयेत्। शरीरसंपातनिवृत्ता स्वयं कुर्यादिति
माधवीयेवाभिरप्यात्वान्। माधवाचार्यस्त्वुक्तं॥ काम्योपवासे प्रक्रांते त्वंतरा मृतसूत
के। तत्र काम्यं व्रतं कुर्याद्दानार्चनविवर्जितमिति त्वंतगवान्। एवं रजस्वलायामपि॥ प्रारब्धदीर्घ
तपसां नारीणां चेद्रजो भवेत्। न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति सत्यव्रतोक्तेः॥ इति

निधीनारूपेड्डीतस्याः॥ अंतरातुरजो योगे प्रजामन्येन कारयेत्। भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च
५५ पतिर्व्रतं। असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते। स्कांदेपि। पुत्रं वा विनयोपेतं भगिनीं भ्रात
रं तथा। एषामभाव एवान्यं ब्राह्मणं वा नियोजयेत्॥ कात्यायनः॥ पितृमातृभ्रातृपतिगुर्वर्थे च वि
शेषतः। उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत्। मात्स्यखंडेपि। व्रती पुत्रः पुरोधाश्च भ्राता प
त्नीसखापि वा। यात्रायां धर्मकार्ये तु जायंते प्रतिहस्तकाः। एभिः कृतं महादेवि स्वयमेव कृतं भ
वेत्॥ इदं सर्ववर्णसाधारणं॥ अविशेषात्। अत्र विशेषमाह त्रिकांडमंडनः। काम्ये प्रतिनिधि
र्नास्ति नित्ये नैमित्तिके च सः। काम्येप्युपक्रमादूर्ध्वं केचित्प्रतिनिधिं विदुः। नस्यात्प्रति
निधिर्मंत्रस्वामिदेवाग्निकर्मसु। न देशकालयोर्नास्ति नारणेरग्निरेवसेति॥ अथ व्रतादिसं ५५
न्निपाते निर्णयः॥ तत्र तिथिद्वयसन्निपाते तत्र तत्रोक्तं स्नानहोमादि क्रमेणानुष्ठेयं॥ अविरोधस
तयत्र तु नक्तैकभक्तादौ विरोधस्तत्र प्राथम्यादेकभक्तं कार्यं॥ नक्तं तु परेद्युस्तत्तिथियोगेन
कालेकार्यं। समकालीनविरुद्धव्रतादौ त्वेकं स्वयं कृत्वा द्वितीयं भार्यादिकारयेदिति माधवाचा

र्यमाह। यत्र तु शिवरात्र्यादौ निषिद्धेपारणं स्यात्तत्र भोजनं विहितं॥ कृतास्थ्योदि वानुत्कारा
त्रौ तु तो चपर्वणि॥ एकादश्यामहोरात्रे तु सक्षाचांद्रायणं चरेदिति भोजननिषेधश्रवणात्॥ त
त्र पारणस्य नैषत्वाद्द्विवेव भोजनं कार्यं। निषेधस्य रागप्राप्तभोजनपरत्वात्॥ विधिप्राप्ते निषे
धानवकाशात् निष्काम्या पार्हिद्यत। एवमष्टम्यादिनक्तव्रते संक्रांतिरविधारादिसंपातेपि न कुर्यो।
जनमेव स्यात्। यत्र त्वेकादश्यादौ वानुक्तिनिषेधस्तत्रैव संक्रांतावपि उपोसतिरात्रिनुक्तिनिषेध
इति निषेधद्वयप्राप्तं॥ तत्रोपवास एव स्यात्। तत्रापि पुत्रिणो गृहस्थस्योपवासनिषेधमतिकिंचि
द्दलं न वाहेति॥ उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेदिति स्मृतेः॥ तथा। चांद्रायणव्रतमध्ये
एकादश्यादौ तु भुक्तिः कार्या। चांद्रायणस्य काम्यत्वेन नित्यबाधकत्वात्। अत्र केचित्। चांद्रा
यणादिव्रतमध्ये एकादश्यादौ आत्तोपवास एव कार्यः। एकादशीदिनग्रासास्तु द्वादश्यां ग्रासाः
यथाकथं। चिन्त्यं ज्ञानं चरित्वा पिंशघृतद्वयं। मासेनैवोपभुंजीत चांद्रायणमथापरमिति या
ज्ञवल्क्येन यथाकथंचिदित्युक्त्वात् काम्येषूपक्रमादूर्ध्वं केचित्प्रतिनिधिं विदुरिति त्रिकांड

मं उक्तवचनात्प्रतिनिधयादिः स्यात्॥ एवमेकादश्यां मेकांतरोपवासादिपारणं मांसाशायां जलपा
५६ रणाब्दस्तो यदा स्त्कार्य॥ आषाढे अशितमनशितं चैव तिलैस्तिरोधयेत्॥ एवं द्वादश्यां मासोपवा
सव्रताद्यपि होमादि चतुर्मासेष्वेवं ज्ञेयमित्यपरस्मृतेः॥ आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हे
माद्रौ न विस्तरः॥ आषाढपौर्णमास्यां तु संध्याकाले तु पस्थिते संकल्पयेन्मासमेकं श्रावणे प्रत्यह
महं॥ स्नानं करिष्ये नियता ब्रह्मचर्ये स्थितास्सती॥ भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां द
यां॥ इत्यादि॥ एतस्य नक्तव्रतत्वात्सायाह्नव्यापिनी ग्राह्या॥ तथा चैवकासपद्जोक्ता। तत्र दि
नद्वये तत्त्विमकृत्सा चेत्परैव ग्राह्या मध्याह्नौवेति॥ इति श्रीमदनंतभट्टविरचिते विधानपा
रिजाते आषाढमासकृत्यानि॥ अथ श्रावणमासविधानानि॥ तत्र श्रावणशुक्ल तृतीया
मधुस्रवास्या गुर्जरदेशे प्रसिद्धा सा च परा ग्राह्येति दिवोदासनिबंधे॥ श्रावणशुक्ल चतुर्थी ५६
तु गणेशव्रते पूर्वविद्धा ग्राह्या॥ मातृविद्धा गणेश्वर इति स्मृतेः॥ श्रावणशुक्ल पंचमी सपरप्र
जाहीपरैव॥ पंचमी नागपूजायां कार्या षष्ठीसमन्विता॥ तस्यां तु तोषिता नागा इतरा सा च

तुर्थी केति स्कांदे॥ न विशेषः॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप॥ द्वारस्योभयतो लेख्या
गोमयेन विषोल्बणाः॥ माहस्तेपि॥ नागाश्चो वस्तुकर्त्तव्या रक्तवर्णेक धारिणः॥ अथ सर्पा इति
स्वैर्याना चैरूर्ध्वतु गोरूपी फणावम्तर्द्धिक र्तव्याहि जिकाव कोसमार हत्वा वाकौ कुमाआगान
गोधूमैः पयसा चर्ययेत्पूजयेद्दधिवद्धार दधिदूर्वांकुरैः कुशैः॥ गंधपुष्पोपहारैश्च ब्राह्मणानां त
र्पणैः॥ ये तस्यां पूजयंति ह नागान्भक्तिपुरःसरा॥ न तेषां सर्पतो वीर भयं भवति कुत्रचित्॥
श्रावणशुक्लद्वादश्यां तु देवे पवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये॥ श्रावणस्य सिते पक्षे कर्कट
स्थे दिवाकरे॥ द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतं॥ द्वादश्यां श्रावणे वापि पंचम्यामथवा
द्विज॥ आनुकूल्येषु कर्त्तव्यं पंचदश्यामथापि वेति॥ दूरस्थ तु कालोत्तरे॥ आषाढांते चतुर्दश्यां
नभस्य नभसोस्तथा॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोस्सममिति॥ तत्र कारस्तु दीपिकादौ॥
नोक्षांतरित काले पूर्वे बुधैर्विधिवत्सन्॥ भूतगोणकालो समार्चनचंद्रिकायां॥ पवित्रारोपणं
विधावध्रवहं नक्षवेधयह॥ कार्त्तिकावधिमुक्ताप्तिकर्त्तव्यमिति नारद॥ हेमरौप्यताम्रक्षौमैः स्त्रैः

कौशेयपट्टजैः॥ कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः॥ कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृ-
त्य त्रिगुणितं सूत्रं च त्रिगुणीकृत्य शोधयेत्॥ तत्रोत्तमं पवित्रं तु षट्त्र्यासद्शतैस्त्रिभिः॥ सप्तत्यासहि-
तं तु मध्यं शतालां मध्यमं स्मृतं॥ सा पंचाशतेनापि कनिष्ठं समाचरेत्॥ स्वाध्यारणं पवित्रा-
णि त्रिभिः सूत्रैः समाचरेत्॥ उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं॥ कनिष्ठं तु पवित्रं स्यात्ष-
ड्त्रिंशद्ग्रंथिशोभनं॥ षट्त्रिंशच्च चतुर्विंशद्द्वादशेति च केचन॥ चतुर्विंशद्द्वादशाष्टाविति केचिन्मुनयो
विदुः॥ विभुररूस्पे तु ग्रंथिकारांतरमुच्यते॥ अष्टोत्तरशतं कुर्याच्चतुःपंचाशदेव वा॥ सप्तविंशति-
रेवाथ ज्येष्ठमध्यकनीयसां॥ अधमं नाभिमात्रं स्याद्ध्रूरुमात्रं तु मध्यमं॥ उत्तमं वै जानुमात्रं
प्रतिमायां नियोधयेत्॥ शिवपवित्रं तु शैवागमे॥ एकादशीस्या [illegible] पवासस्तत्र त्रिंशत्तावा [illegible]
[illegible]कथा॥ पंचाशता वा कर्तव्यं तुल्यग्रंथ्यंतरद्धकं॥ द्वादशांगुलमानानि व्यासाद्दशांगुलानि
च [illegible] विस्तारमाऽनानि चतुरंजकानि चेति॥ पवित्रद्यकादिरोपितत्रैवोक्ता॥ ब्राह्मणो दा-
त्रियो वैश्यस्तथा स्त्री [illegible] एव च॥ स्वधर्मव्यवस्थिताः सर्वे तत्ताकुर्युः पवित्रकं॥ अतो दद्यादिति मं-

त्रेण द्विजो विसौ [illegible] निवेदयेत्॥ [illegible] मंत्रो वा येन वा प्रजयेद्धरिमिति॥ एतच्च नित्यं॥ न क-
रोति विधाने न पवित्रारोपणं तु यः॥ तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम॥ तस्मात्कलि-
मात्रकेन रैर्विष्णुपरायणैः॥ वर्षे वर्षे च कर्तव्यं पवित्रारोपणं हरेरिति तत्रैवोक्तेः॥ अन्यदेव-
तानि पवित्रं वा॥ धनमे [illegible] रमा देवी गणेशः सोमराहु [illegible]॥ भास्करश्चंडिकांबा च वास्तुकि-
[illegible]॥ चक्रपाणिर्हिनेग [illegible] शिवो ब्रह्मा लघ्वे वच॥ प्रतिपत्स्वच तिथिता [illegible] प्रज्यास्तिथिषु देव-
ताः॥ यथोक्ताः सुक्लपक्ष [illegible] तिथ्यः [illegible] स्य चेति॥ [illegible] तिथ्य संभवे हेमाद्रिः॥ चतुर्दशामा-
[illegible] सर्वेषां धारणं दिनमिति॥ [illegible] महोरात्रं त्रिरात्रं धारयेत्तथा॥ देवे तस्-
च संदर्शदिश कालविवक्षयेति॥ [illegible] पवित्रारोपणं काले न करोति
कथंचन॥ [illegible] पवित्रारोप विधिः॥ इयं चतुर्दशी
पर्व विरामायाहाः॥ श्रावणशुक्लपंचदश्यां उपाकर्म कार्यं॥ पर्व एमोदयिपके कुर्यात्॥ श्रावणं ते-
त्तिरीयकाः॥ वह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांति वर्जिते॥ इति निगमः॥ औदयिके पि पर्वणि वि-

शेषः पाराशरमाधवीये ॥ श्रावण्यां पौर्णमास्यां तु संगवास्परतो यदि । तद्दिने औदयिकी स्यात्तदा तन्त्र योदयि
कीन चेदिति ॥ कर्मण्याप्तं चेत्परमेव पर्वेति सुदर्शनभाष्येपि । तैत्तिरीयव्यतिरिक्तयजुर्वेदिनां पूर्वे
५९ द्युरिति माधवः ॥ मदनपारिजातश्च हेमाद्रौ गोभिलः ॥ अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णिके । पू
र्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः ॥ इदं तु सामगविषयं । अन्ये तु प्राहुः ॥ पौर्णमास्यां पर्वाह्णि
एव त्विति श्रुचेतो बह्वृचानामन्येषां पूर्वाह्ण एवेति कालनिर्णये । दीपिकाकारः ॥ पौर्णमास्यामसंभवे पं
चम्यादौ कार्यं ॥ अथ तेषामध्यायोपाकर्मौ प्रथीनां प्राङ्मावे श्रवणेन श्रवणपौर्णमास्यां ॥ श्र
वणस्य पंचमी हस्तेनैवेति कात्यायनस्मरणात् । तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितं । श्रव
णेनैव यत्कर्म उत्तराषाढसंयुते ॥ संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥ तिग्मः । यस्तामुदय ५९
व्यापिनि त्वेतु । विद्यते ये घटिकाद्वयं । तत्कर्म सफलं ज्ञेयं तस्य पुण्यं त्वनन्तकमिति ॥ कात्यायनः
अर्धरात्राद्धस्तात्तु संक्रांतिर्ग्रहणं तदा ॥ उपाकर्म न कुर्वीत परतश्चेन्न दोष इति ॥ तथा ॥ सं
क्रांतिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् । उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति ॥ प

तु बोधायनसूत्रे श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकुर्यात्तु छंदः ॥ ल ... ॥ आषाढ्यामपि दोषे श्रा
षाढ्यां कार्यमि । सेनं परं वेदोपाकरणे आसिकुलीरसंस्थिते रवौ ॥ उपाकर्म न कर्तव्यं कर्तव्यं सिंह
युक्तके ॥ नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ॥ कर्कटे संस्थिते भानौ नोपाकुर्यात्तु दक्षिणे इति
बृहस्पतिः ॥ इदं सामगविषयं सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः ॥ छंदोगामिजितः ॥ कुर्यु
रुत्सर्गं स्वस्वशेषे दर्शा ॥ शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकमिति गार्ग्योक्तेः ॥ यमः ॥ अवरो
धयस्तस्मिन्मासे तु न चर्चयंति चेत्तदा ॥ तदा भाद्रपदे मासि श्रवणेन तु दीयते । इदं शुक्रास्ता
द्यपि कार्यं ॥ निसेनैमित्तिके जाप्यहोमयज्ञक्रियासु च ॥ उपाकर्मणि चोत्सर्गे ग्रस्तदोषो न वि
द्यत इति संग्रहोक्तेः ॥ प्रथमारंभस्तु न भवति । गुरुभार्गवयोर्मौढ्ये वाल्ये वा वार्द्धके पिवा ॥ त
थाधिमासे संसर्पे मलमासादिषु द्विजः ॥ प्रथमोपाकृतिर्नस्यात्कृतं कर्म विनाशकृदिति कश्यपो
क्तेः ॥ एतच्च मलमासे न कार्यं ॥ उपाकर्म तथोत्सर्गं प्रसवाहोन्नवाष्टकाः ॥ मासवृद्धौ परे का
र्या वर्जयित्वा तु पैतृकमिति ज्योतिःपराशरोक्तेः ॥ एतच्च कर्मस्मार्तेऽग्नौ तदभावे लौकिकेऽग्नौ

वाच्यं ॥ अथ श्रावण्यां योपाकृतिं कुर्यात्तत्रोपासनवह्निना ॥ कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्व
५९ ते इत्याश्वलायनकारिकोक्तेः ॥ शिष्यहोमोप्याचार्याग्नौ स्यात् ॥ न स्वोऽग्नावन्यहोमः स्यान्मुक्त्वैकां
समिदाहुतिमिति कात्यायनोक्तेः ॥ एतच्चाश्वलायनाग्निमतएवेति कर्काचार्याः ॥ उत्सर्जनं त्वस्या
यं गौणकाले ॥ पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवेति खादिरगृह्योक्तेः ॥ मुख्यकालस्तु ॥ पौ
षमासस्य रोहिण्यामष्टकायामथापि वेति सिद्धान्तवचनोक्तेः ॥ पौष्यां माघ्यां वा पौर्णमास्यामुत्सृजे
दिति बौधायनः ॥ अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयत इत्याश्वलायनकारिकोक्तेः ॥ पौष
मासस्य रोहिण्यां मध्यमायामष्टकायां वाध्यायानुत्सृजेरन्निति कात्यायनः ॥ सिंहे रवौ
तु पुष्ये पूर्वाह्णे विचरेद्बहिरिति छन्दोगानां काल ॥ यदा पुष्यनक्षत्रं कर्कसंक्रान्तेर्न भवति
तदा विशेषः ॥ छन्दोगपरिशिष्टे ॥ मासे प्रौष्ठपदे हस्ते पुष्ये पूर्वाह्णवेधगे ॥ तदा च श्रावणे ५९
कुर्यादुत्सर्गं छन्दसां द्विज इति ॥ अत्र विशेषमाह कात्यायनः ॥ उपाकर्मणि चोत्सर्गे यथास
कालं मेत्स च ॥ ऋषीन् दर्भमयान् कृत्वा पूजयेत्तर्पयेत्तत इति ॥ उपाकर्मणि चोत्सर्गे च त्रिरात्र

मनध्यायः ॥ अत्र समुद्रगामितिरिक्तानामपि नदीनां रजोदोषो नास्ति ॥ उपाकर्मणि चोत्स
र्गे रजोदोषो न विद्यत इति गार्ग्योक्तेः ॥ उत्सर्जनस्योपाकर्मकाले तत्पूर्वमुत्सर्जनं कृत्वा पश्चा
दुपाकर्म कुर्यादिति ॥ उपाकर्मापराह्णे स्यादुत्सर्गं प्रातरेव चेति हेमाद्रौ गोभिलस्मृतेः ॥ अन्यो वि
शेषः संस्कारप्रकरणे ज्ञेयः ॥ अत्रैव रक्षाबन्धनमुक्तं हेमाद्रौ भविष्ये ॥ ततोऽपराह्णसमये र
क्षापोटलिकां शुभां कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैरिति ॥ इदं भद्रायां न कार्यं ॥
भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ॥ श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनीति संग्र
होक्तेः ॥ तस्मात्तदन्ते कार्यमिति निर्णयामृते ॥ तन्मन्त्रस्तु ॥ येन बद्धो बली राजा दानवेन्द्रो महा
बलः ॥ तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥ श्रावण्यां तु विशेषोऽथ नैरन्त्येऽश्वमनवैव
कर्तव्यो रक्षिकाचारो द्विजान्संपूज्य शक्तित इति ॥ अत्रैव श्रवणाकर्मोक्तं ॥ अथातः श्रा
वणाकर्म श्रावण्यां पौर्णमास्यामिति कात्यायनादिसूत्रात् ॥ ॥ इति श्रीविधानपारिजाते श्रा
वणमासविधानानि ॥ अथ भाद्रपदमासविधानानि ॥ तत्र भाद्रपदकृष्णचतुर्थी बहुला

रव्यामध्यदेशे व्यवस्थिता॥ सा च सप्तम्यामर्धरात्रव्यापिनी याद्या॥ दिनद्वये तथात्वे परैव गौणी यांम्यतु
६० श्रीवटधेनुप्रजा दुर्गा चंद्रकुमारदोर्जिके च। वत्सस्य पूजा शिवरात्रिरेता। पराश्चिता घ्नंति नृपं सरा
ष्ट्रमिति दिवोदासनिबंधोक्तेः॥ अत्र धेनुप्रजाशब्देन बहुलाख्या ध्रुवेति तत्रैव व्याख्यातं॥ भाद्र
पदकृष्णाष्टमी जन्माष्टमी॥ सा च द्वेधा जन्माष्टमी जयंती चेति। तत्राद्या केवलाष्टमी॥ से
व रोहिणीयुता॥ जयंतीति नाम्ना सा प्रोक्ता उपोष्या सा प्रयत्नत इति वह्निपुराणोक्तेः॥ केवला
ष्टम्येवेव नाशे वै यत्कृतं लेपकृद्धेतु जन्माष्टमीव्रतं॥ न करोति नरो यस्तु भवति क्रूरराक्ष
स इति निष्कोक्तेः॥ यत्तु हरिवंशे अभिजिन्नाम नक्षत्रं जयंती नाम शर्वरी॥ मुहूर्तो वि
जयो नाम यत्र जातो जनार्दन इत्यभिजिन्नामनक्षत्रं रोहिण्येव॥ सर्वपुराणानामेकवाक्य ६०
त्वा॥ अनिशं पापं जयतीत्यभिजिदिति श्रुत्यंतरेभ्य॥ इदं जन्माष्टमीव्रतं नित्यं॥ वर्षे वर्षे तु
या नारी कृष्णजन्माष्टमीव्रतं॥ न करोति महाक्रूरा व्याली भवति कानने इति विष्णुरहस्यो
क्तेः पूर्वोक्तनित्यत्वोक्तेश्च। जयंतीव्रतं तु काम्यं मरुजयार्थं कुर्वताः जयंती शुक्लेयेऽनघ॥

धर्मार्थकामं च मोक्षं प्राप्नोत्यसंशयः इति फलश्रवणात्॥ भैरवात्रे तु यत्पापं शतवर्षस्त
स्य जनैः। तत्पापं जनते कुंतीजयंती विष्णुरवो नर इति निर्णयाच्च॥ यदाष्टम्यां रोहिणी
योगस्तदा जन्माष्टमीजयंत्याः मंत्रतंत्रता ज्ञेय॥ न तु सा पृथक्कार्या जयंत्युपवासेनैव सिद्धत्वा
त्॥ तदुक्तं माधवेन। यस्मिन्वर्षे जयंत्याख्यो योगो जन्माष्टमी तदा॥ अंतर्भूता जयंत्यां स्या
दुपोषणं प्रशस्तिवत् इति। किंच॥ अत्र रोहिण्या अर्धरात्रयोगो मुख्यः॥ रोहिण्यामर्धरात्रे च य
दा कृष्णाष्टमी भवेत्॥ तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति विष्णुधर्मवचनात्॥
सप्तम्यां तु रोहिणी निशीथे राजसत्तम॥ सप्तम्यामष्टमी चेद्वा जायते भगवान्रूपाच्चतुर्भुजः। तस्मात्तं
पूजयेत्तत्र यथावित्तानुसारत इति वह्निपुराणवचनाच्चार्धरात्रस्य कर्मकालत्वमवगम्य
ते। तथा च॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्माणि कुर्वीत ह्रासवृ
द्धी न कारणमिति। विष्णुधर्मवचनात्पूर्वत्रैव सप्तमीसहिता अष्टम्यां निशीथे रोहिणी यदि स्या
त्तदा परदिने सत्त्वेऽपि रोहिणीयोगस्य न प्रयोजकत्वं॥ अन्यथा बुधवारादेरपि प्रयोजक

तत्रोपवासं कुर्वीत तिथिभांते च पारणमिति वह्निपुराणे उपवासादि॥ २८

त्यापत्तेः॥ यत्तु रोहिणीसंयुतो पोष्या सर्वाघौघविनाशनी॥ अर्द्धरात्रादधश्चोर्ध्वं कलयापि यदा भ
६१ वेत्॥ जयंती नाम सा प्रोक्ता सर्वपापप्रणाशनी॥ त्यक्त्वा पुराणैव च नं तं तत्कैमुतिकन्यायेन निशी
थयोगस्यैव स्तुत्यर्थमित्यवगंतव्यं॥ यच्चापि स्कांदे॥ उदये चाष्टमी किंचिन्नवमी सकला यदि॥ भ
वते बुधसंयुक्ता प्राजापत्यर्क्षसंयुता॥ अपि वर्षशतेनापि लभ्यते वा यदि वा न वेति तद्दशमाहि
विषयं॥ उपवासश्चाष्टम्यां दिवा रात्रिरुमादिरुद्धे॥ यद्वा॥ उदये चंद्रोदये॥ अतो न व्रतत्रेद इति
साधुः पंथाः॥ इदं व्रतं नित्यं काम्यं चेति बहवो निबंधकारा आहुः॥ अत्राष्टम्याः अपि निशी
थवेधो ग्राह्यः॥ रोहिण्यामर्धरात्रे च यदा कृष्णाष्टमी भवेदिति तस्यैव मुख्यकालत्वोक्तेः॥
अष्टमी रोहिणीयुक्ता निश्यर्धे दृश्यते यदि मुख्यकालः स विज्ञेयस्तत्र जातो हरिः स्वयमि ६१
ति वसिष्ठसंहितोक्तेश्च॥ अष्टम्यत्र चतुर्धा भिद्यते॥ तद्यथा॥ पूर्वेद्युरेव निशीथयोगिनी। प
रेद्युरेव निशीथयोगिनी उभयेद्युर्निशीथयोगिनी। नोभयेद्युर्निशीथयोगिनीति। तत्राद्ययो
र्न संदेहः कर्मकालव्याप्तेः अंत्ययोस्तु परैव। प्रातःसंकल्पकाले सद्भावात्॥ वर्जनीया प्रय

त्नेन सप्तमीसंयुताष्टमी विना ऋक्षेण कर्तव्या वैद्धी सर्क्षापि चेति। सर्वत्र साम्यात्सापि परैव॥ विषमव्याप्तौ तु
आधिक्येन निर्णयः॥ कार्या रोहिणीयोगो व्रते यमे वचतुः प्रकारो ज्ञेयः॥ निंद्यनिषेधसंघटनाविना ऋ
क्षयुक्तविषयेव ख्याता॥ पूर्वविद्धाष्टमी या तु उदये नवमीदिने॥ मुहूर्तमपि संयुक्ता संपूर्णा सा
ष्टमी भवेत्॥ कलाकाष्ठामुहूर्तापि यदा कृष्णाष्टमी तिथिः॥ नवम्यां सैव ग्राह्या स्यात्सप्तमीसं
युता न हि॥ इति पद्मपुराणोक्तेः॥ उदयव्यापिनी ग्राह्या कुले तिथिरुपोषणे॥ निर्णयार्के नगरखंडे च्या
वांछितार्थफलप्रद इति॥ इत्यादिस्मृतेः सर्वे त्वपरैवं वेदितव्याः॥ पूर्वविद्धेत्यादिवचनं तु पूर्वे
द्युर्निशीथेऽष्टम्यभावे दिवा यैर्वोदये च रोहिणीसमये कलादिमात्राष्टम्यां व्रतं कर्तव्य
मित्येतद्विषयमित्याहुः॥ उदयव्यापिनी तिथिवचनमपि निर्णयसत्वे व्रतपरमिति केचित्॥ पि
अत्र कर्तव्यप्रकारे विशेषः॥ ततोऽष्टम्यां तिलैः स्नातो नद्यादौ विमले जले॥ सुदेशे शोभनं कुर्या
द्देवक्याः सूतिकागृहं॥ तन्मध्ये प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता॥ कांचनी राजती
ताम्री पैत्तली मृन्मयी तथा॥ पाषाणमयी मणिमयी चैव वर्णकैर्लिखिता तथा॥ सर्वलक्षणसंप

र्णपर्यंके च परीव्रते। प्रसूतां च प्रसूतां च स्थापयेन्मंचकोपरि। मां तत्र बालकं सुप्तं पर्यंके स्त
६२ नपायिनं॥ यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे॥ तद्वत्कल्पयेत्सार्धं प्रसूतवरकन्यकां। क
श्यपो वसुदेवोयमदितिश्चैव देवकी॥ शेषो वै बलभद्रोयं यशोदादितिरुच्यते॥ नंदः प्रजापति
र्दक्षो गर्गश्चापि चतुर्मुखः॥ गोधेनुज्ञाः कुंजरश्चैव दानवाः शस्त्रपाणयः। लेखनीयाश्च तत्रैव कालि
योपि यमुनाह्रदे॥ इत्येवमादि यत्किंचिच्चरितं मम॥ लेखयित्वा प्रयत्नेन पूजयेद्भक्तित
त्परः। मंत्रेणानेन कौंतेय देवकीं पूजयेन्नरः॥ पंकजैः पूजयेद्देवीं नमो देव्यै श्रियै इति॥ ततो मं
त्रेणैव दद्यादर्घ्यं शय्यार्धं समाहितः। क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव। गृहाणार्घ्यं शशांके
मं रोहिण्या सहितो मम॥ ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते। नमस्ते रोहिणीकांत ६२
अर्घ्यं नः प्रतिगृह्यतां॥ प्रभाते ब्राह्मणांश्च तथा भोजयेद्भक्तिमान्नरः। ॐ नमो वासुदेवाय गोब्रा
ह्मणहिताय च। शांतिरस्तु शिवं चास्तु शिवं चास्त्वित्युक्त्वा मां विसर्जयेदिति॥ अथ पा
रणनिर्णयः॥ हेमाद्रौ॥ नारदः॥ तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं॥ तस्मात्प्रयत्न

तः कुर्यात्तिथिभांते च पारणं॥ तिथ्यृक्षयोर्यदा छेदो नक्षत्रांतमथापि वा॥ अर्धरात्रे यदा कुर्यात्
पारणं त्वपरेहनि॥ इति॥ द्वयोरंते पारणमुक्तं॥ सर्वेष्वेवोपवासेषु दिवापारणमिष्यत इति ब्रह्मवै
वर्त्तवचनं तु प्रत्तांतरविषयमिति हेमाद्रिः॥ नात्र निशीथभोजननिषेधः प्रवर्त्तते। अर्धरात्रे य
दा कुर्यादिति विधिस्पृष्टविधानात्॥ अत्राशक्तौ वह्निपुराणे चोक्तं कुर्यात्तिथेर्वापि शस्तं चार
नपारणं। तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणमिति चोक्तोतिपारणं॥ उत्सवांते पारणमिति
तिथिनक्षत्रयोः समयोगे रहितस्य तिथेरेव बाधकत्वात्॥ संयोगिके व्रते प्राप्ते यत्रैकोपि
विरुध्यते। तथैव पारणं कुर्याद्दैवं वेदबाधस्यात्॥ संयोगिके व्रते प्राप्ते यत्रैकोपि विरुध्यते
तत्रैव पारणं कुर्यादेवं वेदविदो विदुरिति निर्णयामृताच्च॥ इति जन्माष्टमीव्रतं॥ भाद्र
पदामावास्यायां कुशग्रहणं हेमाद्रौ हारीतेन। मासि नभस्यमावास्या तस्यां दर्भोच्चयो मतः।
अयातयामास्ते दर्भा विनियोज्याः पुनःपुनरिति॥ नभस्यमावास्यामासे। तेन दर्शांतमास
पक्षे वजन्माष्टम्यनंतरं दर्शो ग्राह्यते॥ तत्र दर्भाहरणं कर्त्तव्यमिति केचिन्मतं॥ अन्ये तु।

मासेनभस्ये। मावास्यां दर्भोद्धयः स्मृतः इति वाक्येन भस्यशब्दं सम्यंतं पठित्वा नभस्योमाप
६२ षइत्यवारव्याय तत्र दर्भग्रहणं कर्त्तव्यमित्याहुः ॥ तत्र दर्भग्रहणे मंत्रः ॥ विरंचिना सहोत्पन्न पर
मेष्ठिनिसर्गज नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भवेति स्मृतेः ॥ अथ भाद्रपद शुक्ल तृती
यायां हरितालिकाव्रतमुक्तं स्कांदे ॥ सा च परा ग्राह्या ॥ मुहूर्त्तमात्रसत्त्वेपि दिने गौरीव्रतं परे
इति माधवोक्तेः ॥ आद्या मधुश्रावणिका कज्जली हरितालिका । चतुर्थिमिश्रीतास्त्वा निर्दिया
नक्के विधीयते ॥ ततो मानरसा शुक्ला मधुश्रावणिका स्मृता ॥ भाद्रस्य कज्जली कृष्णा शुक्ला च
हरितालिकेति दिवोदासनिबंधे वचनाच्च ॥ अथ भाद्र शुक्ल चतुर्थी वरद विघ्नेशचतुर्थी ॥
सा च मध्याह्नव्यापिनी ग्राह्या ॥ प्रातः शुक्ल तिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेति हेमाद्रौ नृ ६३
सिंहोक्तेः ॥ मदनरत्नेप्येवं ॥ परदिने मध्याह्नव्याप्त्यभावे पूर्वविद्धा ग्राह्या ॥ मातृविद्धा
गणेश्वरस्तु ते ॥ सा च वारविशेषे प्रशस्ता ॥ भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता ॥
महती सा च विघ्नेशमर्चित्वेष्टं लभेन्नरः इति निर्णयामृतोक्तेः ॥ अत्र चंद्रदर्शनं निषिद्धं ॥

तथा चापरार्के मार्कंडेयः ॥ सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चंद्रदर्शनं । मिथ्याभिदूषणं कुर्या
त्तस्मात्पश्येन्न तं त [illegible] दा ॥ तद्दोषशांतये सिंहः प्रसेनमिति वै पठेत् ॥ श्लोकस्तु विष्णुपुरा
णे ॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः इति ॥
अथ भाद्र शुक्ल पंचमी ऋषिपंचमी ॥ सा च हेमाद्रिमते परा ॥ सितापरयुतास्या तु पंचमीहा
विकोक्तेः ॥ माधवमते पूर्वा ॥ सर्वत्र पंचमी पूर्वेति तदुक्तेः ॥ तत्र ऋषीन्पूजयित्वा कृष्टान्नभ
क्षणं अत्यवाच्येन वर्तते ॥ एवं सप्तवर्षाणि कृत्वा सप्त कुंभेषु प्रतिमा सुवर्णनिर्मितं ऋष्यपरं ऋषित
न्मंत्रेण संस्थाप्य तत्र तिजा कृत्वा सप्तब्राह्मणेभ्यो भोजयित्वा तेभ्यः कुंभान्दिये दद्यादिति निर्णया
मृते । भाद्र शुक्लषष्ठी सूर्यषष्ठी सा सप्तमीयुतेति दिवोदासः ॥ अस्यां स्नानं भा
स्करपूजनं प्राशनं पंचगव्यस्य अश्वमेधफलाधिकमिति ॥ अथ भाद्र शुक्ल सप्तमी ॥ अ
मुक्ताभरणसप्तमी ॥ सा च पूर्वा ग्राह्या ॥ तदुक्तं षष्ठी सप्तमीरा ॥ सप्तमी पूर्वविद्धैव व तेषु नि
रिक्षेषु च ॥ अमाये पूर्वविद्धायाः परविद्धापि ग्राह्यता मिति माधवोक्तेः ॥ तत्र व्रतं सावनसौ

वं कर्त्तव्यमितुलं भ स्तनर त्ले ॥ शुक्ले वा भाद्रपदे मासि सप्तम्यां हि कलाशये ॥ स्नात्वा शिवमं
६५ डलके लेखयित्वा तथा विकां ॥ मत्स्या संपूज्य समये कुर्या द्दध्वा कृते गुणं । यावज्जीवं मयास्मा
तु शिवाया त्वाज्ञि वेदितइत्यादि । अथ भाद्रपद शुक्लाष्टमी दूर्वाष्टमी ॥ सा च पूर्वा ग्राह्या ॥ मु
क्तिरे दुर्गानवमी दूर्वा चैव हुताशनी । पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति तिथ मस्मृते ॥
मूलकाष्टमी तीर्थ यत्रा तु मासि च्छन्द्य पदे कवेत् ॥ दूर्वाष्टमी तु सा कार्या ज्येष्ठानक्षत्रं च वर्ज
येदिति ॥ यत्तु परदिन विधायकं तत्सर्वं दिने ज्येष्ठानक्षत्र योगे सति द्रष्टव्यं ॥ दूर्वाष्टमी सदा
त्याज्या ज्येष्ठानक्षत्र संयुता ॥ तथा ॥ ऐंद्र ऋक्षं पूजिता दूर्वा हन्त्य पत्यानि नान्यथा ॥ मत्तुरा
सुरे रामले तस्मात्ता परिवर्जयेदिति हेमाद्रौ निषेधस्तु ॥ इदं च तंभ्रग स्ते हय वन्यार्के च न ६६
कार्यं ॥ शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी ॥ सिंहार्के एव कर्त्तव्या न कन्यार्के कदाच
न ॥ सिंहस्थे सोत्तमा सूर्ये तत्र दिने नृसिंह तत्रैव तिमदनरत्ने ॥ स्कान्दे ते ॥ भाद्रपद शुक्लाष्ट
म्या मगस्त्यो दये चा विनिस्र ति पूर्व तस्या ष्टम्या मे व कुर्या दिति हेमाद्रौ ॥ इदं व्रतं स्त्री

णांनि त्यं ॥ यानपूजयते दूर्वां मोहादिह यथा विधि ॥ त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः
तस्मात्संपूजनीयाऽसा प्रतिवर्षं च यत्नतः इति ॥ पुराण समुच्चयात् ॥ यदा एष मां ज्येष्ठायोगे संप्र
र्ण योगस्तदातु ॥ कर्त्तव्या ॥ चैकत्र ज्येष्ठानक्षत्रयपदा भवेत् ॥ दूर्वामर्च्य च येद्भक्तान वंध्यदिवसं न
चेदितिगौणे ॥ तत्रापि व्रतं कार्यमेव विधिस्तत्रैव विष्णु ॥ शुचौ देशे प्रजाताया दूर्वा यां बाल
णोत्तम ॥ स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत् ॥ दध्यक्षतैर्द्विजश्रेष्ठ [illegible] अर्घ्यं दद्यात्त्रिलोच
ने ॥ दूर्वा शमीभ्यां विधिवत्स्वजयेद्भक्त्यान्वितः ॥ मंत्रस्तु ॥ त्वं दूर्वेऽमृतजन्मासि वंदितासि सु
रासुरैः ॥ सौभाग्यं संततिं देहि सर्वकार्यकरी भव ॥ यथा शाखा प्रशाखाभिर्विस्तृतासि महीतले
तथा ममापि संतानं देहि त्वमजरामरमिति ॥ अनग्निपक्वमश्नीयाद्दध्नि दधिपक्वं तथा ॥ अत्रा
दानवलं ब्रह्मलक्ष्मी यान्ये धुनासम मिति ॥ ज्ञानेऽधिमासे स्तुतिनिर्णयप्रदीपे स्कान्दे ॥ अधिमासे
तुल्ये प्राप्ते नच सदा उदये भुवेः ॥ अथ काकदुर्वा व्रतं कार्यं पुरतोऽनेव कुत्र चिदिति ॥ अत्रैव ज्येष्ठा
दूजोक्ता माधवी मे स्कान्दे ॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठ ऋक्ष संयुते ॥ यस्मिन्कस्मिन् दिने

कुर्याज्ज्येष्ठायाः परिकजनमिति । दिनद्वयेनक्षत्रयोगे तिथ्यनन्त्याख्या । पूर्वेद्युः सायाह्नियोगे पूर्वे
६५ व । नवम्यासक्तायां साद्दशमी नात्र संशयः ।। मासि भाद्रपदे शुक्ले पक्षे त्वैन्द्रसंयुता । रात्रिर्य
स्मिन्दिने कुर्यात्तत्र ज्येष्ठाप्रजनमिति निर्णयोक्तेः ।। क्वचिदस्या अपवादः । यस्मिन्दिने न वेत्स्पष्टा
मध्याह्नोर्द्धमप्यणुः ।। तस्मिन्नुविष्टं प्रजाचनन्ताचे तु पूर्ववासरे इति ।। इदं व्रतं केचन तिथ्यो न
क्तेत्रयोक्तं । तिथावेवाचरेत्तद्व्रं द्वितीयं केवलं दर्शक इति स्मृतेः ।। दाक्षिणात्यास्तु नक्षत्रे एवाच
रंति ।। तथाहि । मैत्रेण बद्धये हि वी ज्येष्ठायां तु प्रजयेत् ।। मूले विसर्जयेद्देवी त्रिदिनव्रतमुत्त
ममिति ।। नमस्कारमंत्रस्तु ।। ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः ।। शर्वायै ते नमस्तु
भ्यं शाकंभर्यै ते नमो नमः ।। अथ भाद्रशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् ।। भा
द्राकासितपक्षेषु मैत्रश्रवणरेवती ।। संगमे नैव भोक्तव्यं द्वादश्या द्वादशी हरेदिति निषेधा ६५
त् । अत्रापि विष्णुधर्मे मैत्राद्यपादे स्वपितीह विष्णुः पौष्णांत्यपादे प्रतिबोधमेति श्रवणम
ध्ये परिवर्तनमेति श्रुतिषु प्रबोधपरिवर्तनयोर्मेनवर्ज्यमिति ।। अत्रैव शक्रध्वजोत्थानमु

क्तं मपसर्गे ।। द्वादश्यां तु सिते पक्षे मासि भाद्रपदे तथा ।। शक्रमुत्थापयेद्राजा विश्वश्रवणवा
सवे इति । इयमेव श्रवणद्वादशी ।। तत्रैकादश्यां द्वादश्यां श्रवणयोगे सैवोपोष्या ।। एका
दशी द्वादश्यां विशेषमपि तत्र च चेत् ।। तद्विष्णुशृंखलं नाम विष्णुसायुज्यकृद्भवेदिति विष्णु
धर्मोक्तेः ।। स्पृष्टमेकादशी राजन्द्वादशीं यदि संस्पृशेत् ।। श्रवणं ज्योतिषां श्रेष्ठं ब्रह्मह
त्यां व्यपोहतीति नारदीयोक्तेश्च ।। न चात्र दिवकार्तां श्रवणर्क्षं भवति तथापि पूर्वेद्युः तिथि
नक्षत्रयोर्योगे योगश्चैवमध्याह्निकोपदिनद्वये सर्वेषामपि शिक इति नार
दीयोक्तेः । दिवाहासीये त्वत्र विशेषपठनात् । रात्रेः प्रथमयामे चेत् श्रवणं द्विवासरे तदा सर्वमि
प्रवक्तव्यात् तेन पारणमिति । द्विकजोयदिने निष्ठे च तु केषुति कल्याणे नवा
शास्त्रं परमित्यवगंतव्यं । इयं बुधश्रवणसंयुक्ता सैव चेद्द्वादशी
भवेत् ।। अत्यंतमहती तस्यां भवतीत्याद्यपि इति ।। यदा चैकादशी श्रवण
णयुक्ता न द्वादश्यां । यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।। एकादशी तदोपो

आपापघ्नी श्रवणं च्चितेति नारदीयोक्तेः ॥ यदा तु द्वादश्येव ऋक्षयुता ॥ तदोपवासद्वयं एकादशीद्वा
६६ दशी च विष्णु नक्षत्रसंयुता ॥ उपवासद्वयं तत्र त्वयोदश्यां तु पारयेदिति विष्णुधर्मोक्तेः ॥ न तु पार
णे नैव व्रतसमाप्तेर्न एकादशीव्रतस्य समाप्त्यापि कथं व्रतांतरस्यारंभः ॥ असमाप्ते व्रते पूर्वे नैव
कुर्याद्व्रतांतरमिति निषेधादिति चेन्न ॥ उभयोरपि तयोरेकदैवत्येन विहितत्वात्तन्निषेधबद्धतोः
निषेधस्य व्रतांतरविषयत्वेन सावकाशत्वात् ॥ एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ॥
न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति हेमाद्रौ भविष्योक्तेश्च ॥ अयं एकराजन्परं का
म्यं श्रवणद्वादशीव्रतमिति स्मृत्यंतरवचनादिदं व्रतं काम्यमेवेति गौडनिबंधाः ॥ दाक्षि
णात्यास्तु ॥ एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात् ॥ न च दपदृत्तं पुण्यं सर्वं प्राप्नोत्यसं ६६
शयं ॥ उपवासमकृत्वा तु नरो नरकमृच्छति ॥ इति वामनपुराणोक्तेः श्रावणद्वादशीव्रतं नित्यमि
त्याहुः ॥ अत्राभुक्त्वेति पदच्छेदः ॥ यद्वा भुक्त्वेति छेदे फलाहारादिपरं ॥ न त्वन्नपरं ॥ अन्याश्रितानि
पापानि त्वेकादशीप्रकरणे निषेधात् ॥ उपवासद्वयं कर्तुं न शक्नोति नरो यदि ॥ प्रथमेह्नि फ

लाहारी निराहारोऽपरेहनि ॥ इति दिवोदासीये भविष्योक्तेश्च ॥ उपवासद्वयं कर्तुं न शक्नोति न
रो यदि ॥ प्रथमेह्नि फलाहारी निराहारोऽपरेह्नि ॥ इति दिवोदासीये भविष्योक्तेश्च ॥ उपवासद्वया
शक्तौ गृहस्थैकादशीव्रतोपवासं च स्तुत्कं मा त्यजेत् ॥ द्वादश्यां भुक्तमद्येतु न त्रैतं श्रवणं यदि उपोष्यैका
दशीं तत्र द्वादश्यां पूजयेद्धरिं पूजयेत्पारयेदिति हेमाद्रिः ॥ अगृहस्थैकादशीव्रतस्तु ॥ एवमेकाद
शीं तु त्यक्त्वा द्वादशीं समुपोषयेत् ॥ पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति नारदीयोक्तेः ॥
पारणं तु भयोतेऽन्यतरांते वा कुर्यात् ॥ तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ॥ पारणं तु ॥
न कर्तव्यं यावन्नैकस्य संक्षयः ॥ विशेषेण महापाल श्रवणं च द्वतेयदि ॥ तिथिक्षये नभोऽन्ते कुर्यां
द्वादश्यां नैव लंघयेदिति निर्णयामृते नारदोक्तेः ॥ पस्यार्थः ॥ तिथिनक्षत्रसंयोगनिमित्तकोप
वासव्रते तिथ्यंते नक्षत्रांते वा पारयेत् ॥ समकालव्याप्तत्वे उभयांतेन द्वादशी न येद्दश्यामि
ति मध्ये अन्यतरांते तु ॥ द्वादशी तु दौ श्रवणं दौ वा श्रवणांतमेव पारणं कुर्यात् ॥ पारणं तिथिवृद्धौ
तु द्वादश्यामुदुसंदृहयात ॥ इत्येकुर्यात्त्रयोदश्यां पारयेदितरथा ॥ द्वादश्यां श्रवणनक्षत्र

स्यमध्याह्ने वा पिबेत् एवं तत्रोपोष्य त्रयोदश्यां पारयेत् ॥ शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्वि
६९ ता। आमध्याह्नात् उपोष्या सा त्रयोदश्यां तु पारणमिति विष्णुरहस्यवचनादिति केचित् ॥ वामनाव
तारनिमित्तोपवासस्तु व्रतहेमाद्रौ न विद्धे ॥ द्वादश्यां तु विधिः प्रोक्तः श्रवणेन युधिष्ठिर ॥ स
र्वपापप्रशमनः सर्वसौख्यप्रदायकः ॥ एकादशी यदा स्यात् श्रवणेन समन्विता। विजया सा तिथिः
प्रोक्ता। भक्तानां विजयप्रदेत्युपक्रम्य ॥ अथ काले ष्ववकृतिये गते सा गुर्विणी च वेत्। सुषुवे न
वमे मासि पुत्रं सा वामनं हरिमित्यादि युक्त्वा ॥ एकादश्यां समं जन्म द्वादश्यां युधिष्ठिर ॥ तेन स देव
देवस्य सर्वथा विजया तिथिः ॥ एवमुक्तिः समारभ्य तामेकादश्यां मयां तवे तूपवासं कारये।
श्रवणान्विते काद्दश्यां ने जवति। तद्विधिस्तु तत्रैव विष्णुपुराणे ॥ नदीनां संगमे स्नात्वा ६९
अर्चयेत्तत्र वामनं ॥ सौवर्णं वस्त्रसंयुक्तं द्वादशांगुलमुच्छ्रितं ॥ हिरण्मयेन पात्रेण दद्यादर्घ्यं
प्रयत्नतः ॥ नमस्ते पद्मनाभाय नमस्ते जलशायिने ॥ तुभ्यमर्घ्यं प्रयच्छामि बालवामन
रूपिणे ॥ एवं संपूज्य देवेशं धारयीत व्रती ततः ॥ नमः कमलकिंजल्कपीतनिर्मलवाससे ॥

महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे ॥ नमः शार्ङ्गासीखड्गपाणये कामनाय च ॥ यज्ञभुक्।
कुलेपात्रे च वामनाय नमो नमः ॥ देवेश्वराय देवाय देवसंभूतिकारिणे ॥ प्रभवे सर्वदेवा
नां वामनाय नमो नमः ॥ एवं संपूजयित्वा तं द्वादश्यां समुदये रवेः ॥ शृंगारकसहितं तं तु ब्राह्म
णाय निवेदयेत् ॥ वामनः प्रतिगृह्णाति वामनोऽहं ददामि ते। वामनं सर्वतोभद्रं द्विजाय प्रति
पादये इति ॥ एकादशी श्रवणयोगाभावे तु दशमीविद्धापि श्रवणयुता ग्राह्या ॥ दशम्येका
दशी यत्र सा नोपोष्या भवेत्तिथिः ॥ श्रवणेन समायुक्ता सा चेत्सर्वकामदेति वह्निपु
राणादि तु स्कंदे मदनरत्ने। वामनपूजा च मध्याह्ने कार्या ॥ अत्र मध्ये वामनो रामरामाविति
पूर्वोक्तस्मृतेः ॥ श्रवणद्वादश्यां तु श्रवणं यदि। तदा तस्य व्रतं कुर्यात् मार्गशीर्षपवान्तरा। मार्ग
शीर्षस्य शुक्लायामेकादश्यां जनार्दनपूजा विहिता ॥ द्वादशी श्रवणोपेता तस्यां तु जनार्द
न। तस्मिन् संपूजिते देवे सर्वे वै पूजिते भवेदिति जनार्दनपूजाविधिर्वामनपूजाविधिव
त् ज्ञेयः ॥ विधेनरस्यानुक्तत्वादिति निर्णयामृते ॥ अत्रैव द्वादश्यां विष्णुपंचकव्रतारंभ

उक्तं॥ स्कांदे॥ औषध्यप्राशिते पद्वे द्वादश्यां श्रवणं यदि॥ तदाऽस्य व्रतं कुर्यात् मार्गशीर्षं यावान्त प।
६८ मार्गशीर्षस्य तु कार्या नेकादश्यां समन्मास्त्रे तौ। एकादशी द्वयं तत्र अमावास्या च पर्व तिथि॥ श्रव
णं विलं नक्षत्रमुपोष्य प्रतिमासकं॥ एवं संवत्सरे पावत्तत्त्वाद्यापनं चरेत्। अत्र तिथिविधेयत्वा
दुक्तं श्राविदर्शः स्यात् पूर्णिमासी तु यामगा॥ मध्याह्नव्यापिनी चैव मध्ये द्विदिन व्रयं॥ द्विन द
यत ग्रव्या तावु पोष्य तत्तेरं दिनमिति विष्णुरहस्ये॥ अत्रैव दुग्धव्रतस्य संकल्पः कार्यः त
त्रेदं चिंत्यते॥ दुग्धव्रतोपसर्वं दुर्वीत। नवर्ज्यमिति केचित् ह्युः॥ नहि प्रकृतिवर्जने वि
कारवर्जनं युक्तं॥ दधिघृतादीनामपि वर्ज्यं पिनाते। न च यत्र प्रकृतिरस्योपजंन्तरस्त्वायसा
दि वर्ज्यं॥ दध्यादेरतथात्वान्न तद्वर्जनमिति वाच्यं॥ श्रीष्णु दध्यादेरप्यावर्जनापत्तेः॥ श्रीष्णुदध्या ६८
देस्तदुग्धरसानुपलंभात्॥ तस्माद्दध्यादिवत्पायसादिकमत्र पमिति॥ अत्रोच्यते॥ भव्य वि
कारे प्रकृति रसोपलंभस्तत्र विकारस्यापि निषेधः॥ मांसनिषेधे मांसविकारस्येव अस्ति
च मांसविकारे मांसरसोपलंभस्तत्स्यापि शाच॥ मांसत्वानपगमात्॥ यत्तु श्रीष्णु दध्या

देर निषेधापत्तिरिति तन्न॥ श्रौष्णु मेकशफं स्त्रैणमारण्यकमथाविकमित्यत्र श्रौष्णुमि
ति विकारतद्धितान्तस्य ग्रहणाभावादानामपि निषेध इति विज्ञानेश्वरेण तद्विकारमात्रस्य निषेध
त्॥ नन्वेवं सति। संधिन्य निर्दशा वत्सगोपयः॥ परिवर्जयेदिति संधिन्यादिक्षीर निषेधे
पि तद्दध्यादिग्रहणं स्यात्॥ सत्यं॥ वचनांतरेण तत्र स्यादिनिषेधमत्॥ तदाहापरार्के शंखः
क्षीराणि यान्यनत्त्यानि तद्विकाराशने बुधः॥ सप्तरात्रं व्रतं कुर्यात् प्रयत्नेन समाहित इति
व्रतं गोमत्रयावकं। तस्माद्दध्यादि भक्ष्ये पायसादिवर्ज्यमिति सिद्धं॥ केचित्तु पायसं क्षी
रद्रव्यांतरं विशिष्टत्वाद्दध्यादिवत्॥ इतरथा अपातंचनेन तद्वधित्वापत्तेः॥ तद्रसत्रस्य नि
त्यातु सेयं दीपकलिकेति युक्ताद्दृष्टानुपपत्त्या॥ मांसविकारेतु मांसत्वानपगमादित्याहुः॥
अपि नाः सक्तु जेनया धानोदधा अयोदशीं॥ पायसं मधु सर्पिर्भ्यां वर्षा सुचमत्रासु चेति
निरवकाशत्वात्ताच्च॥ अन्ये तु प्रवृत्ति शंख वचनाद्दध्यादि सर्वविकारनिषेध इत्याहुः
तत्सदाचारविरुद्धं। अथ चातुर्मास्ये चतुर्दशयाम नंतव्रतं विहितं॥ स्मातु त्रिमलांत्याम्यो

दृष्टिकीर्त्यादेत्तिमाधवः॥ उदये द्वि। मरुत्ती पियास्यावंतप्रतते ति षि रिति रुचित्वात् मध्याह्नव्या
६९ नो ऽप्य वेलायामिति कश्चायां मवणा मध्याह्नव्यापिन्या एवेति। दिवो दास्त निर्बंधे॥ नेत घु कि
स्वं हे॥ यह्हद्दं पदकृति रूपमिति तत्समाचं न विधायक विधिवाचकानां॥ व्रतं कुर्यात् क
रोतु कर्त्तव्यं करोतीति लिङः लोट् तव्य पंचम लकार वत्त्वप्रानामभावात्। व्रातं मुहूर्तिलें।
स्मात्याम् मध्याह्ने देवमर्चयेदिति गणेश व्रतादावविवानं तकथा यो कालविधायक वचनांतरा
भावान्नु अन्यथा॥ सा पिशी जायते चक्रे करे वध्मसुदोरकं। पापेयशेषं विधाय इत्यादि
त्वरातपेवचे। तिकल्पितत्वात्। अपि चाम निवृता रेनोमध्याह्न एव प्रज्येतासर्वनिषिद्धः।
व्रतस्य प्रातर्देवारंभकार्यत्वात्॥ तदुक्तं। प्रातरारभ्यमतिमान्कुर्यात्कृत्यतादिकं। ना ६५
प कृतेन मध्याह्ने पित्र्यकालौ हितौ स्मृताविति रुमाद्री। अन्ये वां तं आहु॥ अनंतव्रतस्यैक
भक्तरूपत्वान्मध्याह्नव्यापिन्यामेव कार्यमिति। तदपि न चतुरस्रं॥ अर्द्धविशाखयुत
मं नर्द्धेनैकभक्तं कुर्यादित्येकभक्तव्रतस्याविधानात्॥ तदपि न चतुरस्रं अर्द्धविशा

खयुतत्वमर्द्धेनैकभक्तं कुर्यादित्येकभक्तव्रतस्य विधानात्। किंतु पत्नाभः संबंधतेनैव
नो धर्मानाश्चयत्वेन तः॥ अर्द्धं विशाखयातत्वमर्द्धमात्मनि भोजनमित्यन्तत्वयतगत्वेन भोजन
विधानात्। अतो चानंत पूजनस्यैव प्राधान्यं गम्यते॥ तस्य च देविकृत्वा सर्वतो वेदेवा।
नाविति स्मृतेः पूर्वाह्न एव विधानं युक्तं॥ अन्यथा न्यस्यापि मार्गस्यैव देयत्वं प्रसज्येतो
सुपप्लव आपद्येत। तस्मात् पूर्वाह्नो वै देवानामिति मलकाद्युदये द्विमरुत्तोपियाख्यानं त
व्रते तिथिरिति माधवाचार्यस्त्वेवं च नाहुक एवकावः॥ कर्मांगामिति सिद्धं॥ नरुमाधव
वचने पिपाश्चयोगाच्छायेनापि नमस्कारं कुर्वन्ति मोः पूर्वप्रोक्तेदिना दिवन्मध्याह्नस्ये
वत्सतिर्नैकाजांतर्विद्धानेतात्पर्यमिति चेन्न॥ दृष्टांतासंभवात्॥ दृष्टांते हि वचनांतरेण
न [illegible] तात्रापुपे तस्य नमस्कारस्य सफलत्वसिद्धेः स्तः इह तस्य निषिद्धत्वेन नमस्कारस्त
तिमाचेतात्वर्थं॥ अनंतु कालांतरविधायकविरुद्धप्रमाणांतरमावान्निर्णयातकाव
विशेषविधानेनतात्पर्यमित्यस्तिमर॥ लिन्चिशोजः॥ किंच॥ तथा भाद्रपदस्यांते चतुर्दश्या

द्विजोत्तम ॥ पूर्णमासमासमायोगे व्रतं चानंतकं चरेत् ॥ तथा ॥ कृत्तिकर्क्षसमेते चेद्भाद्रे पूर्णिमायां च
७० तु ईशी ॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययम् इति निर्णयामृते ॥ अविष्णोस्तरस्कांद वचन
मस्यावश्य ॥ उपवासश्च तासां नां प्रतिकैकापि या नवेत् ॥ उदये सा तिथिर्ज्ञेया विपरीता तु पैतृ
के ॥ रपेवा पिशाकादिकं नक्तं तकौदे ॥ संक्रान्तुत्पन्नस्यापि निवेदयान्या ॥ इति दैवतं नानोपि
अंचास्तगते रवौ ॥ द्विशिखि मुहूर्त्तमध्ये यासा तिथिर्दैवकर्मयोग्येति सुमंतुवचनात्
स्य कर्मणोऽदैविकत्वाद्उदये त्रिमुहूर्त्ता पिन स्यात्पित्रेति सिद्धं ॥ अथ प्रसंगादगस्त्यार्घवि
धिः व्रतहेमाद्रौ भविष्ये ॥ कन्यायां मागते सूर्ये अप्राप्ते तु सप्तमे दिने ॥ कन्यायां समनुप्रा
तेस्य धर्मकाले निवर्त्तते ॥ उदयोत्तरमपि सप्तदिनेषु नवतेव ॥ आसप्तरात्रादुदयाद्धम ७०
स्य दानं धर्मेतत्सोकजनदेवता ॥ याव सप्त सप्तदशाप्येवा सुरस्योर्मप्युत्र वदंति केचित् ॥
मनस्याग स्त्यस्य त्वर्घ्यं ॥ तदुदयकालस्तु गर्गेण उक्तः ॥ उदेति याम्यां हरिदिसंक्रमात् वरेका
धिके विंशति मेघागस्त्यः ॥ तसप्तमे सांस्ते वृषसंक्रमाद्व्रजत्यस्तं गर्गादिनिर्दृष्टकालं ॥

तद्विधिर्विष्णुरहस्ये ॥ काशपुष्पमयीं रम्यां कृत्वा मूर्त्तिं तु वारुणेः ॥ कुंभे वै विन्यसेत्तां तु पु
ष्पधूपविलेपने ॥ दध्यक्षतवलिं दद्यात् चैकुर्यात् प्रजागरं ॥ प्रभाते तु समासाद्य यात्रायामेव
ज्जलाशयं ॥ निशावसाने तत्तांपं प्रपन्नो जातेप्रतिमानुपे ॥ अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपो
षित ॥ विरूढैः सप्तधान्यैश्च वंशपात्रं निधाय वितैः ॥ सौवर्णरूप्यपात्रेण ताम्रवं शमयेनवा ॥
कृर्घ्यं स्थिते न मन्त्रेण जानुभ्यां धरणीं गतः ॥ अर्घ्यमंत्रः ॥ काशपुष्पप्रतीकाश वह्निमारुत
संभव ॥ मित्रावरुणयोः पुत्र कुंभयोने नमोऽस्तु ते ॥ विंध्यवृद्धिक्षयकर मेघतोयविषापह ॥
रत्नवल्लभदेवेश लंकावास नमोऽस्तु ते ॥ वातापिर्भक्षितो येन समुद्रः शोषितः पुरा ॥ लो
पामुद्रापतिः श्रीमान् योऽसौ तस्मै नमो नमः ॥ येनोदितेन पापानि विलयं यांति व्याधयः ॥ त
स्मै नमोऽस्त्वगस्त्याय सशिष्याय सपुत्रिणे ॥ मुनीनां च मुनिश्रेष्ठ सर्वशास्त्रविशार
द दुहिता चिरंका कारं अप्यर्घमेतत् गृह्यतां ॥ राजपुत्री सधर्मचारी कृशोपपतिव्रता ॥ उ
दितोपि जंकाद्वारे अर्घमिमं प्रतिगृह्यतां ॥ घृताचीमेनकारंभा उर्वशी च तिलोत्तमा ॥ वेलोत्सा

वंदित्वो ऽतो देवी अर्घं गृहाण नमो स्तु स्तते। वंशपात्रे कुशे काश्यं फल स स्समन्वितं॥ सप्तधान्यसमो
७१ पेत अर्घं गृहाण नमोस्तु ते। इति। अगस्त्य खनमानैति विधार्घं विनि। वेदयेत्॥ इदं त्वम र्घं को
रख्य च क्षिपत् विसर्जयेत्॥ अर्चितस्त्वं यथाशक्त्या नमो गस्त्य महर्षये। ऐहि कामुष्मिकं ए
त्वा कार्यसिद्धिं व्रज त्वं मे। विसर्जयित्वा गस्त्यं तं विप्राय प्रतिपादयेत्॥ अगस्त्योऽयमनस्यो
स्तु अगस्त्योस्मि त्वयि स्थितः। अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतं॥ त्यजेदगस्त्यमु
द्दिश्य धान्यमेकं फलं रसं। होमं कृत्वा ततः पश्चाद्वर्जयेन्मासवारक॥ होमश्चार्घ्यमंत्रेणैव
न। हुत्वा संस सप्तवर्षाणि क्रमेणानेन यो द्विज॥ प्राप्नोति स्याच्चतुर्वेदी क्षत्रियः पृथिवीपति ७१
वैश्यश्च धान्यसंपन्नः शूद्रश्च धनवान्भवेत्॥ यावद्वर्षाणि कुर्यात्स परं ब्रह्म गच्छति॥
इति नादिष्यो गस्त्यार्घ्यदान विधानं॥ अथ भाद्रपदकृष्णामास्यां पितामहाद्यस्त्रीत्
द्दिश्य श्राद्धं कार्यं॥ तदुक्तं हेमाद्रौ नागरखंडे कन्याराशिंगते रवौ। पौर्णमास्यानु
कर्तव्यं वराहवचनं यथेति मार्कंडेय॥ कन्यायां पितापितामहश्चैव तथैव प्रपितामह॥

त्रयोऽप्यक्रमेणुरवाश्वलीते पितरः परिकीर्तिताः॥ तेऽप्य पर्वतरायेव प्रजावंतः सुरैवेधिता॥ तेतुष्टां
हीनु स्वाचां दीसमृद्धिरिति कथ्यते। एतन्न स्त्रियः पितृत्वात्सरिसर्भा द्रुपदे सह मतान
यनरोचाथश्पक मितिव्यं पोगपादिजाते॥ च च माता मातामहादिकापि॥ पितरो य च प्रज्यते तत्र
माता मातामहा अपि। अविशेषेण कर्तव्यो विशेषानरकं व्रजेदिति भोजको के॥ पितरस्ब स्य पिता
माता च सर्वजपरत्यात्॥ नाहि कश्चिदेतु वचनात्। विशेष इति केचित्॥ तत्र च घपि क
र्पुसमन्वितं सुत्कान्त याद्यां श्राद्धं षोडशं॥ मत्स्यपुच्छकं च शेशेऽ पुपिंडाः स्युः॥ यदि तिस्य पि
तिकास्यायनेन दर्शादौ षट्पिंडाभिहिताः॥ तथापि ना च मातामह आदि॥ पितृ
स्वजनाकपोबकादौ रूपत्वेन चादिनामरूपि चाराधकत्वात्॥ वृत्तिरेवाते
पात्र सप्तमुख त्वेन मां हि भरद्वाज धान्य देवतात्व सिद्धिः॥ पितृव्यप्रसपिंडिकर
णहि का पितृमातापत्नपितृपरत्वेन तस्यासौ तु तीर्थ दानाचार्यापुत्रपौत्रत्रिप्रमातामहादे
तत्तास्तिः स्यादिति दिक्॥ इति श्री मत्सरम वैदिकश्रीमन्नागदेवभट्टात्मजश्रीमद्रनंतच

इति विरचिते विधानपारिजाते कालनिर्णये भाद्रपदमासे विधानं निः॥ अथाश्विनमासविधा
७२ नानि। तत्र महालयश्राद्धं। पद्ममते॥ आषाढीमवधीकृत्वा यः पंचपंचमपक्षः॥ साश्रितास्य कां
क्षंति पितरः। क्लिष्टा अप्यन्नमप्यन्वहं जलं। तत्राधिकमाससंक्रांतियोगे। तिथिश्राद्धस्य मासः॥ विष्णुः
कन्यास्थार्के न्विता पक्षः। सोस्य तद्धेतवस्तु इति॥ अत्र विशेषमाह वृद्धमनुः॥ मध्ये वा
यदि वा पंत यत्र कन्यां व्रजेद्रविः। सपक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति॥ चलो ङे दि
कन्यागते सवितरि दिनानि दश पंच च। पार्वणेनेह विधिना श्राद्धं तत्र विधीयते॥ तथै
व। कन्यागते सवितरि मासस्थानि तु षोडश॥ क्रतुभिस्तानि तुल्यानि देवो नारायणेन विदि ७२
तिपंचदशाहानि षोडशदिनान्युक्तानि। अनेनैवाष्टि॥ षोडशत्वे त्र्येकमायपदति
दिव्यायत्तस्य षोडशदिनत्वेष्वाहु वत्सरपितृलोकाः प्रतृप्ताः। आरभ्यतिथिः पासरेति
द्वितीया॥ आश्विनकृष्णप्रतिपत्प्रसृतिः तत्तलायः पक्षः॥ तत्रावश्यकत्वं गुरुत्वमपाम॥ अत
षोडशकं पत्रककृष्णप्रतिप्रतिपदास्तु॥ चरमाया विशेषेणासोपि दर्शोतिथि कात्यतेति

देवलोके॥ पुनरत्रैव पंचदशाहात्मादेमाशौचास्तो। अथवा पुत्राशपोतु श्राद्धं कार्यं। दिने दिने
त्रिभागहीनपक्षं वा त्रिभागं त्वर्धमेव वा॥ अस्यार्थः। दिने दिने पक्षपर्यंतमित्येकः पक्षः॥ त्रि
भागहीनमिति पंचम्यादि द्वितीयः। अर्धमिति षष्ठ्यादिस्तृतीयः। त्रिभागमिति दशम्यादि
श्चतुर्थः॥ पितुः। प्रत्यब्दं दिनतिथौ तदर्सं चैव माघस्यां देवास्सकृच्छन्नगजच्छायाद्यमितिपं
चमः पक्षः॥ सच॥ आश्विनस्यापितेपक्षे श्राद्धं कर्तुं न शक्यते। दिने दिने ततो राकुर्यासि
तु घट्यादिके दिने। इति स्मृत्युक्तः॥ गौतमो व्याह॥ अथापरपक्षे श्राद्धं पितृभ्यो दद्या
त्पंचम्यादि दर्शातं तनष्टम्यादि दशम्यादि सर्वस्मिन्वेति। अत्र दर्शातमिति सर्वत्रानुष
ज्यते॥ तथा हेमाद्रौ नागरखंडे॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। यो वै श्राद्धं
नरः कुर्यादेकस्मिन्नपि वासरे॥ तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवमित्येक
दिनपक्षोप्युक्तः॥ सतन्यकालसये वर्ज्यतिथ्यादिके प्रयोगपारिजातादौ॥ वसिष्ठः॥ नभस्यां
मार्गवदिने चतुर्दश्यां विजन्मसु॥ एकश्राद्धं न कुर्वीत गृहस्थः पुत्रधनक्षयादिति॥ जन्म

नञ्चैतत्सर्वं श्रुतं चेति त्रिजन्मानि वृद्धगार्ग्यः॥ प्राजापत्येषु पौत्रेषु च पित्र्यं ह्यंगिवित एवा य
७३ स्त्वाद्यं प्रकुर्वीत तस्य पुत्रो वित्तपतीति॥ प्राजापत्येरोहिणी॥ पौत्रैर्देवती॥ पित्र्यं मघा
संग्रहे पि॥ नंदा गम्यका मरपार ग्ग्व ग्नि वित्तका जन्मेगंडे वैधृतिपाते च पिंडान्सापा
सुतेष्मुनि रिति॥ असामर्थ्ये॥ नंदाः प्रतिपत्प्रष्ठेकादश्यः॥ अष्टः सप्तमीका मत्स्यपादश्री॥
प्रायो सोमवारः भद्रः शुक्रः॥ अग्निजं त्रुतिका॥ पित्र्यं मघा॥ कालजं च ज्येष्ठा॥ अत्र संग्रहे
इदं सर्वं सकृन्महालयविषयमित्याहुः पृथ्वीचंद्रोदये नारदः॥ सकृन्महालये कृष्णेपुनः
श्राद्धे खिलेषु च॥ अतीतविषये चैव सर्वमेतद्विचिंतयेदिति॥ अत्रापि कश्चिद्विशेषवाग्दो
हेमाद्रावुक्तः॥ अमापाते भरण्यां च द्वादश्यां मध्यपक्षके॥ श्राद्धे तिथिं च नक्षत्रं वारं च न ७३
विचारयेदिति॥ यदा कन्यार्धवीये श्वेव मेवाभिहितं॥ तत्रापि तिथ्यन्तरे प्रयोसक्तमस्तं
हालयकरणे प्येतत्र निषिद्धमित्याह निर्णयदीपे नागरखंड स्मृतिः॥ आषाढ्याः पं
चमे पक्षे कन्यासंस्थे दिवाकरे॥ मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः॥ तस्य संवत्स
रं यावत् तृप्ताः स्युः पितरो ध्रुवं॥ तस्मात्तत्र च कर्तव्यं प्रकृष्टं श्राद्धं परैर्नरैरिति संग्रहेऽपि मृता
हनि तिथि विशेषो मातामहानां तत्र नंदादि निषेधमन्वकाइतितत्कथं कार्यः॥ आद्यं कार्त्तिका
पौर्णिमा सपक्षे तत्र हादि व सत्र मण्येव व्याख्याताः॥ कात्यायनः॥ यातीर्थे स्वमासस्य मताहे
तु प्रवर्त्तते॥ सा तिथिः पितृपक्षोपि पूज्या निर्यातः॥ प्रमत्तः॥ तिथिच्छेदेन कर्त्तव्यो विनाशौ
चेवमच्छा॥ पिंडं श्राद्धं च कर्त्तव्यं तिथिच्छेदेन वकारयेत्॥ अस्मात्क्षः पक्षमध्ये तु करोत्येक
दिने यदा॥ निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधि इति॥ तथा संपूर्णपक्षश्राद्धकरणे पि
नंदादिनिषेधः कार्यः॥ कन्याधवीये कात्र्यानिविशेषाश्विनस्य पक्षे पक्षे श्राद्धे
कार्य दिने दिने॥ वर्जयेनंदादिवर्ज्यं सर्वमन्ये प्रवर्ज्यं चतुर्दशीति॥ अतएव तिथ्यन्तरे भवति येका
वर्जयित्वा चतुर्दशीमिति याज्ञवल्क्योक्त वचनं तत्र संपूर्णपक्षश्राद्धे वर्जयित्वा चतुर्दशीमि
तिं प्रशस्तास्तिथयो यथा यथा ततापेतरादिति मज्जवचनं तु पर्चम्यादि पक्षविषयमपि
स्यात्॥ अनयादिजातेपुसंहितं॥ अतो नंदादौ सपिंडकश्राद्धे पुत्रवतोप्यधिकारइति

७५ अत्रिरपि। महालये त्रयोदश्यां च दर्शे पुत्रस्य जन्मनि। तीर्थे पित्रोर्निर्वपेत् पिंडान् पितृदारादिकेष
पीति। गालवस्य न चाद्विनिषेधस्तु मतांतरव्यतिरिक्तसकृन्महालयविषयः। तीर्थेषु मतदा-
ह्निविषय एवेति सिद्धं। कुत्रचित्सर्वसारे। विवाहे व्रतचूडासु वर्षमर्धं तदर्धकं। पिंडदानं
मृदा स्नानं न कुर्यात्तिलतर्पणमिति। तदपि महालयव्यतिरिक्तकाम्यश्राद्धविषयं। तीर्थे संव-
त्सरे प्रेते पितृयागे महालये। पिंडदानं प्रकुर्वीत युगादौ नवसप्तमघेषु तिलहस्तपुत्रकेः।
महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि। गतोद्वाहादिकुर्वीत पिंडनिर्वपणं सदे-
ति यमोक्तेश्च। अयमभिप्रायः। कोऽपि श्राद्धत्वाविशेषाद्दैवप्रत्यलेन पिंडदाननिषेधः।।
अत्र संश्राद्धे देवपि त्र्यति मातापितरि न पिंडनिषेधः। मतांतरे सकृन्महालयेपि नपि ७५
डनिषेधः। मतांतरे सकृन्महालयेपि न पिंडनिषेधः। मलमासव्यतिरिक्तसकृन्महालयेनि
षेध इति। संन्यासिनां तु वैदर्पणा महालयं कार्यं। यतीनां चवनस्थानां वैष्णवानां वि
शेषितः।। द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः इति संग्रहोक्तेः।। उत्तरा जेष्ठाध्यक

रणे गौणकालमाह हेमाद्रौ यमः।। हंसे कन्यास्तु वर्षे स्थेशाकेनाप्नि हेवसन्। पंचम्यादि
तत्र देयाः कुयौपिपक्षमो।। श्राद्धौ तत्रकृतं पक्षकृत पंचम्यामुत्थाय इत्यर्थः।। तत्राप्यसंभवे नाति
क्त्वे।। येमृषीप। गन्वितराजन्वाता पंचदशी न वि। तस्माद्दद्यात्र चाद्दत्तं पितृणां वै महालये
तत्राप्यसंभवे नारले।। यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः।। शून्यं प्रेतपुरं तावद्वृश्चि-
कं यावदागतः।। ब्राह्मे। वृश्चिके समतिक्रांते पितरो दैवतैः सह। निःश्वस्य प्रतिगच्छंति शापं द-
त्वा सुदारुणं।। यत्तु जातूकर्ण्योक्तं।। आकांक्षंति स्म पितरः पंचमं पक्षमाश्रिताः।। तस्मा
त्तत्रैव दातव्यं दत्तमन्यत्र निष्फलमिति।। तत्कालातिशयपरं।। नत्वन्यनिषेधकं।। हंसे क
न्यास्थिति चेत्तस्य वैयर्थ्यप्रसंगादिति दिक्।। अमृते।। पुराणसमुच्चये।। मृतस्याब्दे
समारंभे सूतकं निपतेद्यदि। समाहृता हि पितरः सूतकांते विसर्जयेत्।। यदि नैव नरः कुर्या
त्सूतकांते समापनं। घात्तिमत्स्यैभाहुत्पस्तुर तत्स्य इति। चाकल नैनका-
र्ये। मातापितृच सपिंडत्वगयाश्राद्धं महालये। जोचनी पुरुषर्षा द्वौ लैवपार्वणसमृद्धतो।। व
इति स्मृतिदर्पणे महालये कं।। अपात्रद्रवताः। तत्र विश्वेदेवाः विश्वेदेवौ कन्हतौ सर्वास्विष्णुपु
... ऋषिपृष्वोपि न कुर्वीत श्राद्धं मकाले ककृहिचित्। जैतश्राद्धेकाल कामौ काम्ये चधुरि।।१।।

द्विश्राद्धे पुंसो मेषु देवी संस्थ वसंस्थ ता विशिष्टि ति हेमाद्रौ व्यक्तं स्पष्टमिस्मात्रीः तथा। तातांबात्रितयं
७५ सपत्नजननीमातामहादित्रयं सस्त्रि स्त्रीतनयादिताततजननीस्वभ्रातरः स्त्रियः॥ ताता
तात्मजनिस्यप्रत्यधवयुक् जायापितासजरु। शि १ श्यास्यार पितृव्यो महालये विशेषे तीर्थे तथा तर्पण
इति प्रचंड हुक्षेस्यरु वचनं॥ स्मृत्यर्थसारे पि। महालये मातृश्राद्धं पृथक् कुर्यात् सुखस्त्र मिति। अत्र
विशेषः स्मृतिदर्पणे मजवो रु॥ अपने कामात्तरो मस्य श्राद्धे चापरपक्षिके॥ अपहितं पृथ
कुर्यात् पिंडमेकं तु निर्वपेदिति। शिष्टास्तु स्वस्याश्रा कृ विष यतां मत्या पृथक् पिंडत्रयं इति
ताप त्वमातुरेकोद्दिष्टमेव॥ सपिंडीकरणादूर्ध्वं पित्रोरेव हि पार्वणं। पितृव्यभ्रातृमातॄणां
नैकोद्दिष्टं सदैव हि॥ तिशाकाण्यैति॥ जीवत्पितृको पि सपत्नमातुरेकोद्दिष्टं कुर्यात् न तु पार्व
णं पूर्वस्मृतेरेव॥ श्राद्धदीपकलिकायां तु पार्वणमुक्तं। श्रान्द्रव एकवचय श्रोतुर्गे याभ्या दं म ७५
हालये॥ दित्तपत्नीसुतश्राद्धकार्यपार्वणमवद्दूये हिति व्यक्तमुक्तं॥ अत्र यपरिमा
तामहीनां पृथकत्वश्राद्धं नेति जयते तथापि विलं वेस तिपृथक्कार्यं॥ महालये गयाश्राद्धे

श्राद्धे चान्वष्टकासु च ह्रेयं दादशदैवतं तीर्थे श्रौ ह्र मघासु चेत्ति निगमो क्तेः॥ कुर्याद् द्वादशादे
वत्यं श्रौतपद्ये चसर्वदा॥ यथा तीर्थेगयापार्श्वे च एषधर्मः सनातन इति कात्या यनोक्तेः॥ अहमा
द्रिर्न वदेवत्यमाह॥ महालयेगयाश्राद्धे वृद्धौ चान्वष्टकासु च॥ न वदैवत्यमत्रेष्टं शेषं षाट्
पौरुषं विदुरिति धर्मोक्तेरिति। पार्वणैकोद्दिष्टव्यवस्था काहेमाद्रौ। उपाध्याय गुरुश्वश्व
पितृव्याचार्यमातुला॥ श्वशुरस्यात्तु तत्पुत्र शिष्यकृषि स्त्रपोषकाः॥ च गिनी स्यामि
दुहितृमामातुलभगिनीसुताः॥ पितरौ पितृपत्नीनां पितृतुर्मातुस्त्रयास्वरा सखिदन्त शि
ष्याघी स्त्रीर्थे चैवन महालये॥ एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः॥ पितृमातामहादीनां
पार्वणं तु विधीयत इति॥ चतुर्विंशति मतेपि॥ आचार्यगुरुशिष्येभ्यः सखिज्ञातिभ्य एव च
तत्पत्नीभ्यश्च सर्वाभ्यः स्वपत्न्याश्च जलांजलिं पिंडास्तेभ्यः स्वगृह्योक्तपदेनर॥
तीर्थेतिषु चैव सर्वेषु माघमासे मघासु चेति॥ अत्र क्रमात्तन्यत्र त्रैयाचार्यव्यवस्थानेषा
अत्रविधवाकर्तृकश्राद्धे विशेषः स्मृतिसंग्रहे॥ चत्वारः पार्वणाः प्रोक्ता विधवायाः सदै

वहि॥ अथ भर्तृश्वशुरादीनां माता पित्रोस्तथैव च॥ ततो मातामहानां च श्राद्धानमुपक्रमेत॥ त
७६ आभ्रात्रणां च विशेषेण मातामहास्तथैव चेति षट्पार्वणपक्षोपक्रमः॥ अथ सकोनुस्थ गतत्रि
पतित्रिंशि॥ अस्य पितृस्तथैव च विधवाकार्ये घूल्दं यथा कालेन तं दिता॥ अथ पार्वणे॥ वि
धवास्व यंसं कल्पत्वात् न्यत्रालये द्वारकार्ये दिस्तुकः श्रयो गर्भारिजाते॥ एतद्धुत्रवती विष
यं॥ पुत्रवत्यास्तु नऽधिकार एव॥ पुलस्त्यः॥ महालये गयायां च दृगतासूत्तौ त्वयेत्तनि॥ तंत्रे
णाभ्रपणं कृत्वाभ्याद्धं कुर्यात्स्वपक्षपृथक्॥ यद्वैकत्र नवेषां तामे। कोद्दिष्टं च पार्वणं॥ पार्वणे
तत्र निर्वर्त्य एकोद्दिष्टं समापयेत॥ अत्रश्राकेनैकोद्दिष्टेषु श्वले कं ब्राह्मणभोजनं कार्यं॥ अ ७६
पात्रौ तेकस्मिन्न पिब्राह्मणे सर्वैकोद्दिष्टानि जवंति॥ अत एव चतुर्विंशतिमते आचार्य
गुरुविछ्छेन्स्य इत्युपक्रम्य॥ तीर्थे युगे वसर्वे युक्तं सपदेमघास्तु च॥ एकस्मिन्नाह्मणे सर्वाना
चार्यादीनप्यजयेदित्युक्तत्वात॥ अर्धपिंडहान्तु पृथगेव॥ अधमन्यात॥ एकस्मिन्ब्राह्मणे
सर्वानाचार्यादीनप्यजयेत॥ दर्शद्वादशाहपिंडानर्द्धान्ध्वादकारणं वेनतु इति यमोक्तेश्च॥ एको

द्दिष्टे स्वकृतं वाद्यात्सवत्स्या॥ एकोद्दिष्टं द्वेव हिताः नमेकार्थे कपृथिव्यके॥ आवाहनाग्नौक
रणलयदिततपसः अथ दिति एकोद्दिष्टे सपत्नीकायसस्नातामापकृत स्वधावमह इति प्रयो
गेण पिंडदानं कार्यं॥ मलेयस्य जीवतितस्यत्स्यादेन पिंडदानं॥ हाराकाज दितिकेश्चितः॥ अ
नेनतीर्थादितत्स्यादि॥ पृथगेव पिंडदानं स्वगोत्रे परगोत्रे वा दंपत्योः पिंडदानतः॥ अप
पक्विकजेभ्याद्धं पिंडं चोद्धृत्य तर्पणमिति वायुपुराण दिलाहु॥ अथ धुरिजः॥ लोचनौ वेष्य
देवाकार्यौ॥ अपिकन्यागते सूर्ये काम्ये च धुरिलोचनौ विहितिहेमाद्रावादित्यपुराणोक्तेः॥
अत्र वृ किंदिनं क्विन्न प्रयोगे दृष्टि एषकेष्टः प्रयोगेकेसस्त्वंत एवद्दक्षिणं दयेति कालहेमाद्रा
वुक्तेः॥ एतच्च सत्यस्ताद्दिजीवलितकेणपिकार्य॥ दक्षे तीर्थे च सत्यस्ते ता ते च पतितेस्मति॥
येन एवपितादृधा तेभ्यो दद्यात्स्वयंसुतः इति॥ कात्यायनोक्तेः॥ यत्तु॥ दर्शश्राद्धं गयाश्राद्धं श्रा
द्धं चापरपक्षिकं॥ न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च इति कौंडिन्यवचनं तत्सत्यस्तपि
त्रोर्व्यतिरिक्तविषयं॥ काम्यश्राद्धविषयं च॥ अत्र श्राद्धांगतर्पणं तु पक्षाश्राद्धेप्रतिदिनं श्रा

श्रोतरं कार्यं ॥ सकृन्महालये तु क्रेष्टि । कार्यं ॥ तदुक्तं नारदेन ॥ पक्षश्राद्धं महालयं कुर्यात्तर्पणं तु
७१ दिने दिने ॥ सकृन्महालये चैव वपदेऽहनि । ऊहितो द्वं गार्ग्योपि ॥ पक्षश्राद्धे हिरण्ये च अनुव्रज्य
तिलोदकम् पि ति ॥ तथाच योगपारिजाते गार्ग्यः ॥ सकृन्महालये पक्षे मासिके ब्दिके च पितृघ्ने नेतरे ॥
पितृणां ज्ञस्तरं कार्यं निषिद्धाहे पितर्पणं ॥ सकृन्महालये भ्रूं स्यादेकेका स्थलएव हि ॥ त
थानीयं तिथिविशेषे चगाध्यायं शिवपक्षके ॥ निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितं मि
तिस्मृतिरत्नावलीवचनाच्च ॥ निषिद्धाहे पि तिलतर्पणं न कुर्यादेव ॥ इदमूर्ध्वं महालमासेनुष्ठा
कार्यं ॥ वृद्धिश्राद्धं तथा सोमगस्याधेयं महालयं ॥ राजाभिषेकं काम्यं च न कुर्याद्भानुलंघिते ॥ ७१
ते ॥ हेमाद्रौ नागरखंडे पि ॥ नभो वाप्य नभस्ये वा पलमासो यदा भवेत् ॥ सूक्ष्मः पितृपक्षः
स्याद्दन्मनेव तु पंचमम् ॥ एतच्च पित्रोर्मरणे सति प्रथमाब्दे सत्ता ञ्जलि निर्णि ष्यपक्षे तो
इदं तन्निर्स्यं काम्यं च ॥ पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा ॥ प्राप्नोति पंचमे दत्वा श्राद्धं
कामांश्च पुष्कलान् ॥ निजाबालोके ॥ वृद्धिके समतिक्रांते पितरो दैवतैः सह ॥ निश्वस्य

प्रतिगच्छंति शापं दत्वा सुदारुणम् ॥ निति कार्ष्णाजिनिवचनाच्च ॥ एतदतिक्रमे प्रायश्चित्तमु
क्तं माधवीये ॥ दुर्गाष्टम्यां च पंचदश्यां नरः हि मासि यो महालयं महान्यत्ते तथासं प्रणमे
पतितदिति ॥ अत्र कृष्णाष्टम्यां दक्षद्रवेदिति ॥ अत्र च चिरंतनमार्गभ्रष्टा परस्त्रा परपक्ष
स्त्रधितिमाद्य दिवाम्यते ॥ तत्तिथौ चाग्निना ये नित्यसप्तितासीतिर्हि पितुः ॥ अत्र पक्षे वि
शेषो वाराहे ॥ नभस्य कृष्णपक्षे तु यो हि पुत्रो मातृभक्तस्तु ते ॥ पुत्रक पष्ठ पुरासे ॥ कपिलाप
ष्ठि ति ति ॥ व्रतोपवासनियमे ॥ मास्यकंतत्र ष्पृजयेत् ॥ कपिलागोद्विजाग्न्याय दत्वा कतु
कंपंजनेत् ॥ पुराणस्मृत्युच्चये ॥ नाद्रेमास्य सिते पक्षे नानो चैवकरं स्थिते ॥ पाते कुजे च
रोहिण्यां सा पष्ठी कपिला भवेत् ॥ अत्र दश शांतमासस्य यत्र नमहालयो नी स्वसुपक्षे
परन्तु के निर्णयामृते ॥ विधु प्रकाशे च विशेषडतः ॥ स्कांदे ॥ कन्यागते सवितरि यान्यहानि
नाडपदेमुने ॥ तस्य पक्षे तु या पष्ठी भौमवारेण संयुता ॥ रोहिणीरुद्धसंयुक्ता व्यतीपाते
नसंयुता ॥ पद्दिसागरनाम्नां करणेन संयुता भवेत् ॥ आग्नेयेन मुहूर्ते न यः श्राद्धं कान्नवे

व्रत॥ तस्यांच षष्ठ्यां सुपुण्यायां कपिलो भगवानभूत्॥ दुर्लभेयं महाषष्ठी वेदविद्भिः कवेत
७८ सर्वेषां चैव दानानां सत्पुण्यफलदायिनी॥ स्नात्वा सम्यग्विधानेन यथाविधि क्रमागतं॥ पि
तॄश्च संतर्प्य देवांश्च सर्वान्यथाविधि वेदयेत्॥ मंत्रेणानेन देवाय गंधपुष्पादितैः शुभैः॥ कृपा
लु तं तु पशुपुण्यं तत्सुपूर्णं चाक्षयं कुरु॥ त्रयीमयनमस्तेस्तु संपूर्णाणि मे हिता कुरु। एवमर्घ्यं प्र
यं दत्वाग्रे हेयरूपं समाति रक्षेत्॥ तत्र यस्सेत्स्वस्त्रमात्र धान्यं तत्र यतस्सतत्॥ ताम्रपात्रे तु प्र
ति मां तत्र स्वस्तावचनं जपेत्॥ कपिलं वा स्वसाध्वदेवक्र। यतिं च कर्म दे। फलंजयित्वा सप्र
तिमं घटं द्विजातये॥ गंधपुष्पैरलंकृत्य दत्त्वा पापं प्रणाशयेत्॥ अधोगतिगतान्मे ता
न्समुद्दिश्य स्वशक्तितः॥ तिलपात्रादिदानेन ताडुसुश्च रति संकटात्॥ इति॥ इयमेव च ७८
न्द्रषष्ठ्यनुच्यते॥ सा च चंद्रोदयव्यापिनी ग्राह्या॥ उक्तंच भ्रतपात्वे प्रवत्तिडु कैत्रे विष्ये॥ त
द्रूप्रदेमासि पक्षेप्रपक्षे सितेतरे। चंद्रषष्ठी व्रतं कुर्यात्सर्ववेधः प्रशस्यते॥ चंद्रोदय
यदा षष्ठी सर्वा हि चापरेहनि॥ चंद्रषष्ठ्यासितेपक्षे सैवोपोष्यापरत्र तरति॥ अत्रस स

ध्यां॥ पूर्वेद्युः दश्यकाम्यक्षुरं कार्यं॥ अत्राह माधवाचार्यः यनेन माघ्या वर्षसि तंत्रस्तु के।
एतेन माघ्या वर्षश्रेष्ठपराम्परपक्षे इति॥ इदं सत्तम्यादिपुत्रिषु सुकार्यमिति नारायण व
त्तिकृत्॥ अपष्ठी चंद्रोदये आह्ने॥ आषाढ्यां पंचमे पक्षे या यमस्मामी स्मृता॥ त्रयोदशी ग
जच्छाया गयानु त्वा तुपेतके॥ अत्रे वमलान्वनाग्रं तमुको॥ पूराणसमुच्चये॥ प्रियौ चन्नंग
म पहेसि तास्मीकास्य कन्यागतस्कुर्यएव॥ समापयेत्तत्र तिथौ च यायं सर्पस्तु सर्वार्हगतो
